No. ४२९५

Title अध्वर मीमांसा कौतूहल वृत्तिः
२ पाध्याय:

Author श्री वासुदेव दीक्षित:

Extent ३९ Age ?

Subject मीमांसा शास्त्रं

अध्वरमीमांसाकौतूहलवृत्ति द्वितीयाध्यायः

४२५४

मीमांसा

कौ[illegible]रवि

१५५०

६६

२

॥श्रीगणेशाय नमः॥ ॥श्रीं॥ अथातो धर्मजिज्ञासेति प्रमाणस्वरूपसाधनफलैर्धर्मो जिज्ञास्यत्वेन प्रतिज्ञातः। तत्र प्रथमेऽध्याये
धर्मप्रमाणं निरूपितं। तत्र मेयो धर्म इति सामान्यतो धर्मस्वरूपं चानन्तर एवावगतं। इदानीं द्वितीयेऽध्याये धात्वर्थभेदप्रयुक्तभा
वनाभेदः पूर्वं विधीयते। सेयं धर्मभेदविचारः प्रक्रम्यते। तत्र धात्वर्थभेदस्य भावनाभेदकत्वं धात्वर्थस्य भावनां प्रति करणत्वं वि
ना न निर्वहतीति भावार्थाधिकरणं धर्मभेदविचारोपोद्घाततेनारभ्यते। तत्र भावार्थाधिकरणप्रवृत्तेरेकस्मादर्थादभि
निर्वृत्तिर्णियाधीनत्वात्[illegible]पोद्घाततेन प्रतिपादाधिकरणम्[illegible]। उद्भिदा यजेत पशुकामः श्येनेनाभिचरन् यजेत चित्रया य
जेत पशुकामः अग्निहो[illegible]त्रं जुहुयात् स्वर्गकामः यः कामयेत पशुमान् स्यामिति स पयसा होतारं प्रयुञ्जीतेत्यादि। अत्र यतो अभिपूर्वक
चरतिः शत्रुवधे वर्त्तते फलेहेतोः शत्रुप्रलयः। शत्रुवधार्थमिति यावत्। संचहेना अग्निहोत्रेनेत्यादि मन्त्रः। तं प्रयुञ्जीत ब्रूयात्। किमे
वंजातीयकेषु वाक्येषु उद्भिदा पशुकामः यजेत पशुकाम इत्येवं क्रियापदानि द्रव्यगुणवचनानि नामपदानि च प्रत्येकं फ
लपदेन संबध्यन्ते न तच्छब्दवृत्तिपदानां पूर्वकस्य न समर्थार्थाभिधायकानि। उत तेष्वेकमेव पदं फलपदेन संबध्यते तद
वा पूर्वकस्य न समर्थार्थाभिधायकमिति संशयः। नवोद्भिदादिपदानां द्रव्यमेव गुणवाचकत्वे निर्णयकर
णपूर्वकं धात्वर्थनामधेयत्वस्य साधितत्वेन धात्वर्थानि [illegible] सर्वधाप्रसक्तेः कथमयं संशय इति वा सू
तेषां अधिकरणानां सिद्धं धात्वर्थस्य करणत्वं समवेतं नैव प्रवृत्तिः। न हि करणत्वं नामा तो उद्भिदादिपदानां धात्वर्थनामत्वे

राम०
२

धेयत्वं धात्वर्थस्य करणत्वाभावे घटते । धात्वर्थस्य करणत्वं लिङादीनामपि इष्टं । एवं च अधिकरणोपजीव्यकामिमभावार्थाधिकर-
णे तिङन्तस्याख्यातविषयत्वेन । एवं योऽग्निहोत्रादिपदानामिदानीं धात्वर्थनामधेयत्वस्याप्तिरिष्टं इत्युपगमावचनताया अप्रविसभावित्वात्
द्भवत्वस्य पूर्वसंशयः । नत्र फलस्य सर्वाभ्यर्हितत्वेन प्रधानत्वात्प्रधानसंबंधलोभेन सर्वेषां फलपदे नैवान्वयो युज्यते किं-
च सर्वेषां फलसंबंधाभावे उपपदार्थानां द्रव्यगुणानां धात्वर्थे धात्वर्थस्य च फलेनान्वयप्याभतस्य फलं प्रति धात्वर्थस्य उपा-
देयत्वं विधेयत्वं गुणत्वं च उपपदार्थानि प्रतिवचनदेशत्वं अंगत्वा घत्वं प्राधान्यं चेति विरुद्धत्रिकद्वयं प्रसज्येत मत्वर्थत्वस्य
णा अप्रयत्नेन वाक्यभेदपरिहारे तुल्य एव दोषः । तस्मात्सर्वेषां फलपदसंबंध इति प्राप्ते क्रमः । सर्वेषां फलेन संबंधे फले
संबध्यते । इतरत्तु पदं तत्रैव कंघं विशेषणतयान्वेति । न चैवं सति विरुद्धत्रिकद्वयापातश्शंक्यः । एकस्मादपूर्वं-
मिति सिध्येत् सति च स्वामाराणां भावार्थाधिकरणन्यायेन धात्वर्थस्य करणत्वसंभवेन ऽग्निहोत्रादीनां तन्त्रामतया आभेदेनै-
वान्वयाभ्युपगमात् सोमेनेत्यस्य तु गुणत्वाभावात् मत्वर्थलक्षणा तस्मादेकस्यैव फलपदसंबंध इत्येकस्मादेवापूर्वं इत्युक्तं
त्रे प्रतिपाद्याधिकरणे । तदेवं प्रतिपाद्याधिकरणे एकस्मादपूर्वमिति सिद्धं । किं यजतेत्यादि क्रियापदं फलपदेन संब-
ध्यते । न तत्र धात्वर्थ एव अपूर्वं कल्प्यते । उत उपपदगुणाद्द्रव्यवाचकः फलपदेन संबध्यते न तत्रोपपदार्थ एवा-
पूर्वमिति संशये सिद्धान्तेनोपक्रमते । भावार्थाः कर्मशब्दास्तेभ्यः क्रियाप्रतीतिः एषह्यर्थो विधीयते । भावार्थाः प्र-
त्ययेन भावनाप्रतिपादकाः । कर्मशब्दाः प्रकृत्या कर्मवचनाः यजेत जुहुयादित्यादयो ऽतेभ्य एव क्रियाकार्या । अपूर्वं

२

प्रतिपेन । कल्प्येत । यजेतेत्यादय एवापूर्वकल्पनासमर्थार्थप्रतिपादका इति यावत् । न तु द्रव्यगुणशब्दा एवं तथाविधाः
कुतो न स्युरित्यत आह एषहीति हि यस्मात्कारणात् । एष धात्वर्थ एव फलभावनाकरणत्वेन विधीयते नान्यत् । अतो
यजेतेत्यादय एव शब्दास्तथाविधाः स्युः । तथा हि यजेत पशुकाम इत्यादौ फलं साध्यरूपतात्सिद्धरूपं साधनम
पेक्षते । ननु साध्यरूपं द्रव्यगुणावेव वचसि सिद्धरूपत्वात्तदाकांक्षापूरयितुं शक्नुतः । यागादयो धात्वर्थास्तु स्वयं साध्य
रूपत्वात्साधनाकांक्षापूरयितुं नोशते । तत्र स्वरूपस्योद्दिष्टद्रव्यगुणयोर्व्यापारविशेषानुप्रवेशमन्तरेण फलसंबंधानु
पपत्तेरपेक्षितं व्यापारविशेषमयं यन्यादिधात्वर्थ समर्पयति । तत्र धात्वर्थविशेषो विना द्रव्यगुणेन एवापूर्वमिति एवं पस
मुत्राप्यनिराकरोति । सर्वेषां भावोऽर्थ इति येषामुख्यो लेप्रयोगे रूपोपलब्धिस्त्याख्यातेनानामानि तस्मात्तेभ्यः परएकाकांक्षा
भूतत्वात्लेप्रयोगेष्वेषात् सत्त्वार्थस्यैव प्रयोगेण विधीयते । नान्याख्यातानि तस्मात्तेभ्यः । क्रियाप्रतिपत्ताविज्ञनत्वात्प्रयो
गस्य । एकार्थपर्यवसायित्वादेकमपीदं सूत्रं व्याख्यासौकर्याय द्वेधा विभज्योपपादितं भाष्यकारः सर्वेषामुपपदार्थानां द्र
व्यगुणानामेव भावः । कर्मनिष्पत्तिः । भाव्यः कल्प्यः अर्थः अपूर्वः सर्वेषामिति हेतुत्वस्य शेषत्वविवक्षायां षष्ठी । सर्वैरूप
पदार्थैर्द्रव्यगुणैरेवापूर्वं कल्प्यमुत्पाद्यमिति चेत् तत्राह । येषां शब्दानां लौकिके प्रयोगे प्रयुज्यन्ते शब्दा अत्रे
ति युक्तस्तस्यार्थः ... रूपोपलब्धिः अभिधेयस्वरूपं विद्यते तानि नामानि द्रव्यगुणशब्दाः । न
स्यादित हेतोः तेभ्यः द्रव्यगुणेभ्यस्य परस्य साधनस्य आकांक्षा नेत्यध्याहार्यमिति केचित्त वस्तुतस्तु अकांक्षेति

राम: २

ष्टेः कांक्षाया अभावः स्वार्थः कुतः स्वप्रयोगे भक्तत्वात्। स्वकीयशब्दप्रयोगकाले विद्यमानत्वात् तस्मादित्यस्यैव विवरणमेतेन। एषां तु शब्दानां
स्वा। स्वकीयेऽर्थे ऽसमीचीनोऽधारणादाकांक्षायाः प्रयोगः। अर्थसंबंधः न विद्यते प्रयोगकाले ऽर्थो न विद्यत इति यावत्। नामाख्यातानि पदानि तेषां दि
ति इदंतानि धात्वर्थानां साध्यरूपत्वात् निष्पन्नो साधनाकांक्षास्तीति भावः। तस्माद्धेतो ते भाव एवाख्यातशब्देभ्यः क्रियाप्य एवं प्रतीयेत कस्येनत
दर्थानामेव फलसंबंधात्। ननु द्रव्यगुणशब्देभ्यः द्रव्यगुणानां सिद्धरूपाणां धात्वर्थनिष्पादकत्वाभावेन तदर्थत्वे धात्वर्थानां पदार्थत्वाप
त्तौ धात्वर्थेभ्यो द्रव्यगुणेभ्य प्रत्येकमप्येकस्मिन्नागोरवापत्तेः धातुभ्य एवापूर्वकल्पनायां तद्द्रव्यगुणानां तन्निष्पादकत्वेन तदर्थता
इपूर्वांतरं तेन कल्प्यमिति लाघवं न तु द्रव्यगुणानां सिद्धरूपत्वेऽपि स्वर्गे द्वियकामस्य साधनाश्रयस्यैवाभावात् धात्वर्थानामपि फलोद्देशप्रवृ
त्तेकत्वव्यापारविषयत्वरूपकरणाद्व संपादकतया द्रव्यार्थत्वसंभवात् अनिष्टरूपकस्यानाप्रसक्तिरित्यस्वरसात् नामेवापूर्वकस्य ले
युक्तं तत्र माहश्रीतत्वात्प्रयोगस्येति। प्रयुज्यमानधात्वर्थस्य भावनया सह एकं पदमाश्रितत्वात् सहश्रवणात् धात्वर्थस्यैव भावनाकरणता
दिति यावत्। तस्मादेव क्रियायाः अपूर्वं प्रतीयते तेनान्वयः। अयं भावः। तृतीयाश्रवणाद्वितीयादिश्रवणाभावादिकरणमित्येतावन्मात्रमवगतं। ननु भाव
नाकरणमिति ननु यजेतेत्यादिपदान्तरसमभिव्याहारलभ्यं। यजेतेत्यादिषु तु प्रकृतिस्वशब्देन धात्वर्थः प्रत्ययांशेन भावना तदुभयसमभि
व्याहारलक्षणपदश्रवणाद्धात्वर्थो भावनाकरणमिति संगच्छते। न तथा धात्वर्थकरणत्वं पदान्तरसमभिव्याहारमनपेक्ष्य प्रकृतिप्रत्य
यसमभिव्याहारमात्रगम्यमपि तिन्नतृतीयाश्रवणापेक्षया पदश्रुतिरिह प्रबलेति। न च साध्यरूपस्य धात्वर्थस्य कथं साधनत्वमिति वाच्यं
गामर्थत्वान द्रव्याणां सिद्धत्वाभावेऽपि पश्चात्त्वसाधनतां निष्पन्नस्य तस्य साधनत्वोपपत्तेः। तस्माद्धात्वर्थस्यैव भावनाकरणत्वात्तनए

णा पूर्वमिति सिद्धं प्रयोजनं पूर्वपक्षे उद्भिद्येनादिपदानां गुणविधित्वादुद्भिद्येनादिद्रव्येण पशुं सिद्धान्ते तु धात्वर्थस्य करणत्वेन करण
त्वे तीयांतानामुद्भिद्येनादिपदानां तन्नामधेयत्वाद्व्याख्यासु तु सोमयसे निमापात्सोमेन पशुं। सोमेन यजेते त्यत्र च सोमायचारे प्रतिनि
धिर्नोपादातव्यः पूर्वपक्षे सोमस्यापूर्वार्थत्वेनादृष्टार्थत्वात् अदृष्टार्थानां प्रतिनिध्यभावस्य षष्ठस्य तृतीये प्रतिनिधिवेदिकाया
वक्ष्यमाणत्वात् सिद्धान्ते तु सोमद्रव्यस्य धात्वर्थयागनिर्वर्तकत्वेन दृष्टार्थत्वादस्ति प्रतिनिधिरित्याद्यथाप्रथमम्। स्यादेतत् प्रस
यवाच्यांशभावनाप्रतिपत्तिर्विषयः करणमित्युपपन्नं धात्वर्थातिरिक्तभावनास्वरूपस्य दुर्निरूपत्वात् तथा हि किं कर्तृव्यापारो भावनाऽ
त प्रयत्नः आहोस्वित्स्पन्दः प्रयत्नस्य दाक्ष्यमते एवानाद्यः कर्तृव्यापारस्याधिश्रयणादिरिति च यस्य पक्षे धात्वर्थत्वेन तदतिरिक्तभावनात्वानु
पपत्तेः। न च विक्लित्तिरेव पचेरर्थ इति शक्यं तथा सति कृष्णलानां घृते श्रपयतीति पाकविधानानुपपत्तेः। एवं यजादावप्यूह्यं नान्व
धिश्रयणादिकर्तृव्यापारस्य धात्वर्थत्वेऽपि तदतिरिक्तस्य प्रयत्नस्य प्रत्ययवाच्यभावनात्वमिति द्वितीयः पक्षः सा स्विदिति वेन्न रथो ग
च्छतीत्याद्यनुपपत्तेः अचेतनस्य रथस्य प्रयत्नाभावात् न च लक्षणया तन्निर्वाहश्शक्यः देवदत्तो गच्छतीत्यादौ घटपटेऽस्याप्रतीति
वैलक्षण्याभावात् न तृतीयः यतते जानातीत्यादि धात्वर्थकर्तृके व्यभिचारात् आत्मनस्स्पन्दाभावात् न चतुर्थः शब्देऽभिव्याप्ती
साहोव्यभिचारात् नहि प्रयत्नस्य होवा शब्दस्याप्रतिनस्याद्धात्वर्थातिरिक्तभावनास्वरूपं दुर्निरूपमिति चेत् नैष दोषः यजते प
चतीत्यादौ यागं करोति पाकं करोतीत्यादिविवरणान्यथोत्थभवाच्च यागः पाकस्तद्धोतनुभयाभावाद्ध्याख्यातप्रत्ययस्य करो
तिसमानार्थत्वं करोत्यंशकरोतिश्चासाधनार्थकस्सकर्मकः न च कर्मत्वस्य पानमेव भवति न सत्तं भवनं यस्य निःसंचापि नमस्ता

ननस्य क्रियमाणत्वं खलु पुष्पकाशयोरिवेति मा या तत्ततश्च उक्तसंघटानस्य वस्तुन उत्पत्त्यनुकूल उत्पादककर्तृव्यापारः करोतेरर्थः भावयते
श्चायमेवार्थः। भवतेरुत्पत्त्यर्थात्प्रयोजकव्यापारे तत्प्रयोजको हेतुश्च हेतुमति चेति णिचोऽनुशासनात्। एवं च पचति पाकं करोति पाकं भावयतीति पर्या
याः। पचिधात्वर्थश्च विक्लित्तिरिति महाभाष्ये स्पष्टं तथा च तण्डुलरूपकर्मगतविक्लित्तिः पचिवाच्या तत्प्रयोजको देवदत्तादिकर्तृव्यापारोऽधिश्रयणा
दिनिचयरूपश्चाख्यातप्रत्ययवाच्यः स एव च कर्तृव्यापारो भावभावनाशब्दाभ्यामुच्यते एवं यजते यागं भावयति जुहोति होमं भावयति ददाति दानं
भावयतीत्याद्यूह्यं न च करोतेर्नोत्पादनार्थकत्वेन तत्समानार्थकतयाख्यातप्रत्ययस्योत्पत्त्यनुकूलव्यापाररूपभावनावाचित्वं लभ्येत नैवम
स्ति करोतेर्यत्नार्थकत्वात् तथा च प्रयत्नरूपभावनावाचित्वमेवाख्यातप्रत्ययस्य वक्तुमुचितमिति वाच्यं। यत्नं करोति श्रीहरिरित्यादिवचनेन नैयायिकैरुप
मानस्य कृञो यत्नार्थत्वानुपपत्तेः। कृञो यत्नार्थत्वे यततिवदकर्मकत्वापत्तेश्च। न चेष्टापत्तिः करोतीत्युक्ते किमित्याकांक्षायास्तत्तदुक्तेत द
नकांक्षाया अस्य सर्वानुभवसिद्धत्वेनापह्नवायोगात् भोजनाय यतत इतिवद्भोजनाय करोतीत्यापत्तेश्च। एतेन उक्तसंघटितपर्यायत्वं करोतेर्निरस्तं। तथा
सत्यकर्मकत्वेन घटं करोतीत्यनापत्तेः। घटत्वसंघातमस्यार्थे घटः करोतीत्यापत्तेश्च तस्मादुत्पत्त्यनुकूलव्यापाररूपभावनैव करोतीत्यर्थ इति
तत्समानार्थकाख्यातप्रत्ययेनापि सैवोच्यत इत्यास्थेयं। न च स्तु धात्वर्थातिरिक्ताभावना। तथापि नापि प्रतिधात्वर्थस्य पाकं करोतीति करणत्वेन लोके
विवरणानुपपत्तिः तस्य करणत्वं खलु साध्यमिति चेत् सत्यं धात्वर्थातिरिक्तकर्मपदसमभिव्याहारे पचतीत्येवं लोके पाकं करोतीति ओदनं पचति।
इत्युक्ते पाकेन ओदनं करोतीति च विवरणं लोके दृश्यते तत्र यद्यपि पाकस्य कर्मत्वेनान्वयः न तु दानानुकूलत्वाधिश्रयणादिपरत्वेन चयः अधिश्रयण
ादिविशेषानादरेण पाकानुकूलो व्यापार इत्येवं सामान्येनाख्यातप्रत्ययवाच्यतां भजते यदा तु ओदनं पचतीत्यत्र पाकेन ओदनं करोतीति कर

रणत्वेन धात्वर्थत्वानयः तत्पाकानुकूलव्यापारत्वेन सामान्यरूपेणैवाधिश्रयणादिविशेषधर्माणां रूपेण सन्तन्यमानां भजनो धात्वर्थस्तु पाकः
प्रत्ययवाच्ये तस्मिन्व्यापारे करणान्तोऽनेककारकाणामभिधः स्वसंबन्धाद्योगात् यथैवाधिश्रयणादिनिचयेन पाको जायते न तु पाकेनाधि-
श्रयणादिनिचयः तथापि पाकस्याधिश्रयणादिनिचयं प्रति साधकतमत्वरूपकरणत्वासंभवे फलोद्देशप्रवृत्तकर्तृव्यापारनि
ष्पाद्यत्वेरूपं करणत्वं संभवतीति न दोषः तत्र करणस्य कर्तृव्यापारेणानिष्पत्तिर्द्विधा स्वरूपेणातिशयविशिष्टतया च तत्र पाकस्या
धिश्रयणादिनिचयेन स्वरूपेणानिष्पत्तिः कुठारेण वृक्षं छिनत्तीत्यत्र तु द्वैधीभावानुकूलोद्यमननिपतनादिव्यापारनिचयेन कुठारस्य
द्वैधाभावसंकाद्विनिघातातिशयादिविशिष्टतया निष्पत्तिः एवं वेदविधौ ह्यभिर्यजेतेत्यत्र यागस्यैव कर्मलाभानुकूलव्यापारत्वसामा
न्येनाप्रयत्नसकल्पादिसिद्धिशेषरूपानारूढेणागम्यते व्रीहियस्तु तत्र करणं यजेत स्वर्गकाम इत्यत्र फलस्य कर्मलाभानुकूल
व्यापारत्वसामान्यरूपेणाभ्युपायनादिसकलव्यापारनिचयस्तज्जन्यविशेषरूपादरेण प्रत्ययेनाभिधीयते तस्मिंश्च व्यापारे यागः क
रणं यागस्य दृष्टादृष्टार्थविघातप्रयाजादिकर्तृव्यापारेण स्वरूपेण स्वर्गधनतासंपादकातिशयविशेषविशिष्टतया नो ससाफलो
द्देशप्रवृत्तकर्तृव्यापारनिष्पाद्यत्वात् यद्यपि साधकतमं करणमित्युक्तं व्याकरणानुसारजनकविशेषस्यैव करणत्वमिति साकांक्ष इति तथापि तन्
रूप्येवमुपपाद्यं कुठारेणाच्छिनत्तीत्यत्र द्वैधीभावानुकूलोद्यमननिपतनादिव्यापारेण कुठारं प्रति स्वरूपेण साध्यः कुठारोऽपि न स्वत्र।
स्वरूपेण साधनं किन्तु द्वैधीभावजननसामर्थ्यरूपाधानातिशयविशेषविशिष्टतया कुठारः उद्यमननिपातनादिव्यापारनिच
ये द्वैधीभावानुकूलव्यापारत्वरूपापन्नो साधनं कुठारेऽभिघातातिशयविशिष्टस्स स्वविह्य उद्यमनादिव्यापारे द्वैधीभावानु

राम:

कूलव्यापारात्मना संपद्यते। ततश्च द्वैधीभावानुकूलव्यापारेऽद्यमानो हि कुठारः करणमित्युक्ते सविशेषणो हीति न्यायेन द्वैधीभावनिष्पन्नो कुठारः
करणमिति पर्यवस्यति। एवं यजेत स्वर्गकाम इत्यत्रापि दृष्टादृष्टोपकारविशिष्टतया यागस्य अवघातप्रयाजादिकर्तृव्यापारे स्वर्गानुकूल
व्यापारत्वरूपापन्ने साधनत्वं सविशेषणो हीति न्यायात् स्वर्गोत्पत्तौ पर्यवस्यति तत्र प्रयत्नादिभिरार्थिकैर्लौकिके साधने स्वधात्वादिभिश्च
वैदिके स्वरूपेण निष्पन्नो पि यागो अन्वाधानप्रयाजादिभिर्व्यापारैः स्वतन्त्ररूपापन्नैः फलसाधनात्मना निष्पद्यत इति तेन रूपेण यागस्याग्न्य
न्वाधानादिसाध्यता। अग्न्यन्वाधानादिव्यापारस्य च तत्तद्रूपेण तत्साधनता। तत स्वरूपमेव यागस्य कर्तृव्यापारं प्रति साध्यत्वं साधनत्वं च
न विरुध्यते। तथा कर्तृव्यापारस्यापि यागं प्रति तन्त्वेवमपि अग्न्यन्वाधानादिरूपव्यापारस्य अग्नीनन्वादधाति व्रीहीनवहन्ति व्रीहीन्प्रो
क्षति तण्डुलान् पिनष्टि समिधो यजति तनूनपातं यजति विसृजमानत् कृमते इत्यादितन्त्रशब्दसन्निहितत्वात् कथं यजेतेति प्रत्ययवाच्यत्वा।
किं च अग्न्यन्वाधानादिव्यापारस्य किं केन कथमिति संबन्धत्रयविशिष्टभावनायां तृतीयाकांक्षापूर्वकस्य भावनासमर्पिविरहमिति चेत्सत्यं अ
त्वाद् धातोस्त्यादिभिस्तत्तद्रूपेणाग्न्यन्वाधानादिव्यापारनिचयस्याभिहितत्वे पि अन्योन्यसाद्व्यापारत्वसामान्यात्मना प्रत्ययवाच्यत्वविरहः।
एवं न भव्यरूपेणैवाग्न्यन्वाधानादिव्यापारनिचयस्य तृतीयाकांक्षापूर्वकत्वेन भावनांशत्वं सामान्यात्मनाऽन्वयित्वं चाविरुद्धं। तत्र प्रत्ययेन
सामान्यात्मना प्रतीतो व्यापारः केनेति विशिष्याकांक्षितो अग्न्यन्वाधानादिः कथं व्यापारितव्यमित्याकांक्षितो अग्न्यन्वाधानादिजन्यदृष्टादृ
ष्टोपकारसंपादनरूपादनुरूपाद् इति विवेकः तत्सिद्धं धात्वर्थातिरिक्तं भावनास्वरूपं तत्र धात्वर्थः करणं तत एवापूर्वमिति यजेत साध्याख्यातशब्दादे
वापूर्वमाक्षिपतीति पार्थसारथिमतानुसारिपंथाः। अत्र यद्यप्यत्र तृतीयस्यत्वती ये प्रकरणाधिकरणे वक्ष्यामः इत्यभावार्थाधिकरणं। धात्वर्था

५

5

देवापूर्वमिति स्थितं तत्रापूर्वं साधयितुम् इदम् आरभ्यते। यजेत स्वर्गकाम इत्यत्र यागस्वर्गोदिरिक्तम् अपूर्वं नाम किंचिद् अस्ति न वेति संशयः। नास्त्य-
पूर्वं प्रमाणाभावात् न तत्र प्रत्यक्षं प्रमाणं रूपाद्यभावात्। अविनाभूतलिंगाभावाच्च नानुमानं आगमोऽपि नैवंविधोऽस्ति यागोऽपूर्वद्वा-
रा स्वर्गं जनयतीति। सादृश्याग्रहणाच्च नोपमानं गंधोऽपि न च यागस्य क्षणिकस्य अतकालांतरभाविस्वर्गसाधनत्वान्यथानुपपत्त्या व-
स्त्वंतरम् अपूर्वं नाम किंचित्कल्प्यत इति शक्यते वक्तुं कल्प्यमानस्य तस्य अप्रतसाधनत्वविरोधितया तदुपपादकत्वासंभवात्। साधनत्व-
बोधकशास्त्रेणाव्यवहितत्वस्य बोधितत्वेन मध्ये वस्त्वंतरस्वीकारे तद्विरोधात्। अव्यवहितस्य कुलालपित्रादित इव यथासिद्धत्वेन साध-
नत्वव्याघातात्। न च यागस्य स्वर्गजननशक्तिः याऽसैवापूर्वमुच्यते तत्र शक्तेरवस्त्वंतरतया स्वयं साधनत्वाभावेनाव्यवधायकतया
यागस्य साधनत्वानतया व्याहन्यते। अस्तु वा वस्त्वंतरमेवापूर्वं तथापि व्यापारत्वेन यागस्य साधनत्वं न तद्व्याहंतुमिष्टेन स्वांगं स्वमवधा-
यकमिति न्यायादिति वाच्यं। शक्तिमति व्यापारवति च यागे क्षणिकत्वेन विनष्टे शक्तेर्व्यापारस्य चावस्थानायोगात् कल्पितं हि सत् क्षणिक-
स्य यागस्य कालांतरभाविस्वर्गजनकत्वमिति चेत् न शास्त्रप्रामाण्याच्छिन्नस्यापि यागस्य स्वर्गसाधनत्वकस्य नोपपन्नेः शास्त्रप्रामाण्या-
त् तदस्मदूपे लाव स्थानं वा यागस्य कल्प्यतां अतो नापूर्वं वस्त्वंतरं प्रतीति प्राप्ते सिद्धांतयति। चोदना पुनरारंभः। पुनः शब्दः पूर्वपक्षव्यावृत्त्यर्थः। चोद्य-
तेऽज्ञाप्यते इति चोदना अपूर्वं कर्मणोऽस्तीति शेषः। कुतः। यतः कर्मणः फलस्यारंभ उपपद्यते तथा हि शास्त्रप्रामाण्यात् कल्प्य-
मानमपि प्रमाणांतरेणाविरुद्धमेव कल्प्यते विनष्टस्य कार्यारंभकत्वं च सर्वप्रमाणविरुद्धं न च पूर्वोक्तभवकृष्ण्यपनाडीनामिव वि-
नष्टत्वेपि कार्यारंभकत्वं किंचस्मादिति वाच्यं तेषां संस्कारविशेषविध्यानमुखेन तदुपपत्तेः। एवं च तत्र वात्तानभ्युपगमात्। अभ्युपगमे च-

एमः
५

गते विवादेन । एवं क्षणिकस्य यागस्य पाचकार्यारंभपर्यन्तस्थानमपि सर्वप्रमाणाविरुद्धं कल्पयितुं शक्यं । न यागमात्रस्य सहस्रं घटपटयितुमीशान्तरं
सा पा कृतयागसात्मन एव फलमिति कल्पनालेशाद्दर्शकर्मणारंभभाव्यमलादिसंधिकरणोऽसंभृतुसामान्यार्थत्वादंगवदिति गुणासूत्रे कृत्वा
निराकरिष्यते । न चापूर्वकल्पनायां यागस्य साधनत्वव्याघातः स्वशक्त्यात्मनः स्वव्यापारात्मनो वापूर्वस्य यागसाधनत्वपरिपंथित्वाभावात् । य
द्यपि शक्तिमति व्यापारवति च यागेन वर्तते तत्स्वरूपानासंभवः । तथापि कार्यबलात् कल्प्यमाना शक्तिर्यथा कार्यं निर्वहति तथा कल्प्या इह च
शक्तिरात्मनिष्ठतयैव कार्यं निर्वहति के सा तत्र निष्ठैव यागस्य शक्तिः कल्प्यते एवं व्यापारोऽपि न च हि समीहितसाध्योद्देशप्रवृत्तसाधने
न वस्तु ध्यर्थं पत्रसाध्यमानत्वमेवावान्तरव्यापारत्वं व्यापारेण समलमपि न तत्र प्रयोजकं अन्यथा काष्ठैः पचतीत्यत्र ज्वालायाः पूर्वान्त
भवान्तरो वा संस्कारस्य व्यापारत्वानुपपत्तेः । तस्मादसंस्पर्शवत्त्वे स्वतन्त्रः तदिदं श्रुतफलसाधनत्वान्यथानुपपत्त्या कल्पितमपूर्वं यद्व्यवस्थि
तफलसाधनत्वात्परमापूर्वमिति वदन्ति । तत्र केचिद् विकायायापि षष्ठे तदुत्पत्तिप्रकारः कथ्यते । सर्वांगोपकृतेन यागेन परमापूर्वमुत्पद्य
ते । अंगानि च कानि चिद्धागान् [illegible] स्वरूपोत्तरकालानि चिरत्तरकालानि च तत्र यागस्वरूपत्वेन तथा गृहीतानि यागानि मिलितानि युगपदेव यागेनोपका
रं जनयन्तीत्येकादशेव कल्प्यते । अंगानां च सर्वेषां क्रियात्मकानां क्षणिकानां मेलनं साक्षात् संभवात् स्वस्वजन्यापूर्वमुखेनैव कल्प्यपि संगा
पूर्वाणि सिद्धिः मिलितेरपि तेरंगापूर्वैर्मे धर्मेव [illegible] तस्य यागस्योत्पत्तिविधिगतेन साक्षात् तत्स्वरूपप्रकारं जननासंभवात् स्वजन्यापूर्वमुखेने
वेत [illegible] प्रकारजनकत्वं तेषामंगापूर्वाणां वाच्यमिति तत्र पात्रादग्नुहृतादेवयागाङ्गिविदपूर्वमुत्पद्यत इतीव कल्प्यते तदिदमुत्पत्त्यपू
र्वमित्युच्यते । तन्मुखेन सर्वांगापूर्वैः सह फलनाधायमानत्वस्यापूर्वमिति नवोत्पत्त्यपूर्वमेवांगोपकृतं फलं साधयत् किं परमापूर्वं नाम ॥

६

6

वाच्यं। यागफलयोस्साध्यसाधनभावे निर्दिष्टे हि कथंभावाकांक्षा भवति नानिर्दिष्टे। तन्निर्देशश्च यागस्य नश्वरत्वेन कल्पनां विना न संभवतीति
प्रथमपरमापूर्वमेव कल्प्यं न तत्तत्सत्पूर्वं। तत्पश्चात्तन्निर्वाहाय पश्चादेव कल्प्यमिति सपूर्वद्वयकल्पनावश्यकी। एवमनेकेहविष्कायामपी
ष्टौ यावंतो यागास्तावन्त्युत्पत्त्यपूर्वाणीति विशेषः। तत्र प्रधानानां फलसाधनतानिर्वाहाय प्रथमं परमापूर्वमेकं सर्वप्रधानसाध्यं कल्प्य
ते फलवाक्ये एष शब्दोपात्तानां प्रधानानामेकफलसाधनत्वस्यैकादशाद्यधिकरणोक्तव्यवस्थापयिष्यमाणत्वात्। समुच्चयाङ्गसाहित्यसि
ध्यर्थं प्रतिप्रतिकाम्यमुत्पत्त्यपूर्वाणीति कल्प्यन्ते। न च प्रधानानां साहित्यसिध्यर्थं प्रथममुत्पत्त्यपूर्वाण्येव कल्प्यन्तां तैरेव फलसिद्धेः। किं परा
मापूर्वेणेति वाच्यं। फलाकांक्षायां झटिति तेन फलसाधनतानिर्वाहकतया प्रथमं परमापूर्वकल्पनाया एवोचितत्वात्। यद्वा प्रतिप्रधा
नमपूर्वाणि प्रथमं कल्प्येरन् तन्निर्वाहाय फलापूर्वाण्येव स्युः। न तूत्पत्त्यपूर्वाणीति तत्र समस्तमाधेवमाग्नान्यायेन धर्माणामपूर्वार्थतया
प्रथमकल्पितापूर्वार्थत्वमेव स्यात्। ततश्चाङ्गोपकृतेभ्यो यागेभ्यो पूर्वसिध्यर्थं पुनरपि प्रतिप्रधानमुत्पत्त्यपूर्वाणीति कल्प्येरन्निति गौरवं
स्यात्। तस्मात्फलवाक्ये एकशब्दसंगृहीतैर्बहुभिरपि यागैस्सह स्वोत्पत्त्यपूर्वमुखेन परमापूर्वमेकमेव जन्यते उत्पत्त्यपूर्वाण्येव तु प्रतिप्रधानं
भिद्यन्ते। तदेवमुत्पत्त्यपूर्वं परमापूर्वं च सर्वत्र साधारणं। दर्शपूर्णमासयोस्तु समुदायापूर्वद्वयमधिकं तथाहि आग्नेयोष्टाकपालः पुरोडा
शः आज्यहविरुपांशुयाजः अग्नीषोमीय एकादशकपालः पुरोडाश इति पौर्णमास्यां त्रीणि प्रधानानि आग्नेयः पुरोडाशः ऐन्द्रं दधि ऐन्द्रं पय
इति त्रीण्यमावास्यायां प्रधानानि तत्र दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति फलवाक्ये सकृदुच्चारितेन यजिना तंत्राभिधानशक्तिमहिम्ना
समुदितानां षण्णां यागानामेकफलजनकतया एकप्रयोगोपनिपाते प्राप्ते प्रतित्रिकं प्रयोगभेदविधानमिदं वाक्यद्वयं प्रवृत्तं पौर्णमा

एमः

६

सांपौर्णमास्यायजेतामावास्यायामावास्ययायजेतेतितदेतद्दे कादशाएवसपृथंभविष्यातीतत्रपृथक्करणाविभक्तिनिर्देशासपरनिरपेक्षसैके
कस्यत्रिकस्यकरणत्वमवगम्यतेनचतत्फलापूर्वप्रतिबन्धकं शक्यंतत्नपरस्परसाहित्यावश्यंभवात्।ततश्चनिरपेक्षसाधनत्वेनावगतात्र्याणांत्रि
काभ्यांयुगपत्फलापूर्वारंभेनैरपेक्ष्यबाधप्रसंगेननद्वाशयपृथक्करणत्वश्रुतिनिर्वाहासंभवात्तदर्थप्रतित्रिकयकैकंसमुदायंएवंम
गीकर्तव्यमिति।एवंचातुर्मास्येष्वपिवैश्वदेवेनयजेतप्राक्‌विवरणप्रधासैश्चरदिसाकमेधैस्ततोग्रहेम्ब्रह्मैवत्तूरहेदुमासिच्छत्तु
र्षुवामासेषुशुनासीरीयेणयजेतेत्यत्रचत्वारिसमुदायपर्वाण्यधिकानासादियथायथमत्वां।नचैवमपिसर्वांगोपाकृतयागतःप
रपापूर्वमिसलत्पपन्नंसंनिपत्योपकारकाणांमवघातादीनामनुष्ठानसमयेप्राधान्यापूर्वस्यैवासत्त्वेनतदुपकारस्यासंभवात्।नच
प्रयाजादिवदपूर्वद्वारातःसंभवत्यवघातादीनांदृष्टार्थतयाप्रपूर्वाभावादितिचेत्सत्यंसंनिपत्योपकारकाणामवघातादीनांनियमाद
ष्टरूपद्रव्यदेवतासंस्कारद्वाराशक्तिविशेषविशिष्टयागजननद्वारातदुत्पत्त्यपूर्वनिष्पत्तौतद्द्वाराफलापूर्वनिष्पत्तौचव्याप्रियन्तेतथा

रा८

विधयागजन्योत्पत्त्यपूर्वस्यैवफलापूर्वजनकत्वात्।प्रयाजाद्युपकारकाणांतुसाक्षादेवोत्पत्त्यपूर्वेभिःफलापूर्वनिष्पत्तौव्याप्रियन्तेनचैवं
सतिसाक्षादुपकारजननेव्याप्रियमाणानांद्वाराद्युपकारकाणांप्रयाजादीनामेवेत्स्वभावाकांक्षयाखीकारस्मात्ततत्वचनेनामेवं
विकृतावतिदेशस्याप्यवघातादीनांसंनिपत्योपकारकाणामितिवाच्यं।कथंभावयेदित्युपकारजननप्रकारमात्रस्यापेक्षितत्वात्‌।ननुसा
क्षादुपकारजननप्रकारएव।ततश्चयुक्तमवघातादेःसर्वेषामेवांगानामित्थंभावाकांक्षासंग्रहीतत्वात्सर्वांगोपकृतयागतःपरमा
पूर्वमित्येतियुक्तं।हत्यपूर्वाधिकरणे।धात्वर्थस्यापूर्वमितिभावार्थाधिकरणेऽपिस्थितं नदेतत्सकृत्‌विदःपवदित्तुमिरमारभ्यतेव्रीहीनवहंति

तं३ लानपिनष्टिपिशानिसंवपतीत्यादिषु किमवघातादिस्मोपूर्वमपि नवेति संशयः तदर्थं चेत्यं चिंत्यते किमवघातार्था व्रीहयः उत व्रीह्य
र्थोवघात इति यद्यवघातार्था व्रीहयः तर्हि व्रीहिसाधनकावघातस्य दृष्टप्रयोजनाभावादस्य पूर्वं यदि तु व्रीह्यर्थोवघातः तर्हि दृष्ट
वैतुष्यद्वारेण व्रीह्यर्थत्वादवघातस्यावास्यपूर्वमिति फलेनापि अवघातार्था व्रीहयः इत्येवं युक्तं न चाग्निमाधिकरणे द्वितीयायाः स्वार्था
र्थं कृतत्वात् हि तावद्विधिवेला द्वितीयं तावत् स्यात् एवमिति व्यपतेतन्यायेनेहापि द्वितीयाश्रिता व्रीह्यर्थत्वमेवावघातस्य युक्तमिति वा
च्यं अवघातस्य हि दृष्टवैतुष्यार्थत्वेन स्वाभाविको कृत एव प्राप्तत्वेन तत्साधुत्वापावश्यप्रकृतेः अपूर्वं कल्पनीयं तच्च यदि व्रीहि द्वारा
कं स्यात् तदा व्रीहिघातस्य व्रीह्यर्थत्वमद्दृष्टद्वारेणैव वाच्यं स्यात् पूर्वमिति अथ अवघातविशिष्टद्व्यस्य विधेयत्वेन वाच्यतया दृष्ट
द्वारावघातस्य द्रव्यार्थत्वे द्रव्यविशेषणतयावघातविधिवैयर्थ्यापत्तेः एवं च व्रीह्यर्थत्वेवघातस्य द्रव्यात्के पूर्वमवघातादेक
मिसदृष्टद्व्यकल्पनाप्रसंगात् द्वितीयाश्रिसवगतमपि व्रीह्यर्थत्वं परित्यज्य सक्तुं जुहोतीसवद्द्वितीयाया हि तीयार्थत्वं सक्तनाश्र
यणेनावघातार्था व्रीहय इति युक्तमाश्रयितुं एवं प्रोक्षणादिवाक्येष्वप्युह्यमिति ध्रुवसि न तैयतिनानि द्रव्यगुणप्रधानमभू
तानिएवातः सत्त्वावर्ध्यं इति पूर्वस्त्रोपात्तान्याख्यातानि तद्रूपः प्रासङ्गिकाः तान्याख्यातानि गुणप्रधानचकर्मप्रकल्पशाभि
धेयत्वेनप्राप्तानि द्रव्यद्विधाभवे प्राप्तयथाधोरादिकानगसर्थोकर्मकेसादिनाकृप्रत्ययश्चाध्यबाहृतितिणिजभावेरूपादिव्यो
र्व्यपदतीतिविधार्थे द्वैधमितिरूपं अस्माचतत्वात्तद्गुणशब्दस्यपूर्वनिपातः गुणाभूतानितावद्दश्यन्ते येद्रव्यमनुविकीर्यन्तेतानि
प्रधानभूतानिद्रव्यगुणाभूतत्वात् प्रयाजाभ्यजतीत्यादिषुयेः यद्भिधेयैः प्रयाजादिभिः नहीयमानाद्रव्यं दृष्टधर्मवत्पान

ध्रु
१

विकीर्य्यन्तेनोत्सादपितुनिष्पद्यतेतामारभ्यातानिप्रधानभूतानिद्रव्याणिपेष्याणितत्साध्यत्वेनप्रधानकर्मप्रतिपादकानिकुतएतत्द्रव्यस्यगु
णभूतत्वात्अग्न्यादिद्रव्यस्यप्रयाजादिदृष्टकार्यनिर्वर्तकतयातत्तद्गुणभावंप्राप्तत्वात्द्रव्यार्थत्वेप्रयाजादीनांतद्दृष्टस्यद्रव्यदृष्टस्य
चकल्पनापत्तेः।गुणभूतानिदर्शयति।येस्तुद्रव्यंविकीर्य्यन्ते।गुणत्वंप्रतीयेतेतस्यद्रव्यप्रधानत्वात्॥तुशब्दःपूर्वविषयव्रीहीनवहन्तीत्या
दिषुयेःयदभिधेयैःअवघातादिभिःव्रीह्यादिद्रव्यंवैतुष्यादिदृष्टधर्मवत्तयाविकीर्य्यते।उत्सादपितुनिष्पद्यतेतंतेषुअवहननादिषुगुणाःजा
तावेकवचनंअवघातादिद्रव्यंप्रतिगुणःतत्साधनतयाप्रतीयेनकुतः।नस्यावघातादेःद्रव्यप्रधानत्वात्दृष्टवैतुष्यादिरूपव्रीह्यादिद्रव्यार्थ-
तात्।नचावघातादेःदृष्टवैतुष्यार्थत्वेद्रव्यादवघातादितत्त्वापूर्वकल्पनागौरवमितिवाच्यंतत्रापिदृष्टद्वयकल्पनापदिव्रीह्यादिद्रव्यमवघा
तादिविशिष्टमिहविधीयतइत्युच्येततेनैवमितिफलार्थतयाप्राप्तमेवव्रीह्यादिद्रव्यमुद्दिश्यावघातादिमात्रंविधीयेअतोनद्रव्यादृष्टकल्प
नाप्रसक्तिः।नाप्यवघातेव्रीह्यादिद्रव्यार्थतानिर्व्रीह्यपूर्वकल्पनादृष्टवैतुष्यद्वारैवतत्संभवात्।एवंचसतिनैकस्याप्यपूर्वस्यकल्पना:
प्रसक्तिः।नचैवंसत्यवघातादेर्वैतुष्यादिदृष्टार्थत्वस्यलोकतएवसिद्धत्वाद्विधिवैयर्थ्यमितिवाच्यं।नखविदलनव्यापारसादिफलकनियमवि
धानार्थत्वान्नचैवमपिनियमादृष्टस्यकल्पनीयत्वात्कोविशेषइतिवाच्यं।व्रीह्यादिसाधनकावघातादिविधावपिसर्वद्रव्यविधयोनियमवि
धयइतितात्पर्यकन्यायेनविशेषणभूतव्रीह्यादिद्रव्यविधेर्नियमार्थतयानियमादृष्टस्यावर्जनीयत्वात्।एवंचव्रीह्यादिसाधनकाव
घातादेर्दृष्टप्रयोजनाभावादपूर्वार्थतायामवघातादितोव्रीह्यादिद्रव्याद्वापूर्वद्वयकल्पनास्यात्।व्रीह्याद्यर्थावघातादिविधौतुनियमादृष्टमात्र
कल्पनेतिलाघवं।नचैवंनियमादृष्टरूपापूर्वसद्भावान्नास्त्यपूर्वमितिकथमुच्यतइतिवाच्यं।नियमादृष्टस्यक्रियाफलत्वानिष्पाद्यत्वेनतस्यकल्प-

त्वव्यवहारयोग्यत्वात् अवघातादितो पूर्वभावित्वेनेन फलत्वेनापूर्वभावस्य विवक्षितत्वादिति दिक् । इति तात्तिद्वाधिकरणं । दर्शपूर्णमासयो
रुपते स्तु न समाप्तीति किमयं स्तुवां सम्मार्गः प्रयाजादिवत् प्रधानकर्म उत गुणकर्मेति संशयः पूर्वस्मिन्नधिकरणे दृष्टोपकारं गुणक
र्म दृष्टोपकारकं प्रधानकर्म स्रुक्प्रयुक्तं स्यादित्यदृष्टार्थावघातादितानां तु वांवेदास्य दर्भमुष्टिविशेषस्यायं सम्मार्गतोन किंचन दृष्टोपकारं य
था मन्त्रतः प्रधानकर्मत्वमेव सम्मार्गस्य प्राप्नं यदि च गुणकर्म स्यात् तर्हि दृष्टोपकारकत्वस्य गुणकर्मत्वलक्षणस्य तत्राव्याप्तिः स्यात् ।
दृष्टोपकाराभावात् । अदृष्टोपकारकत्वस्य प्रधानकर्मलक्षणस्यातिव्याप्तिश्च । अदृष्टोपकारकत्वात् न च कर्तुरीप्सिततमं कर्म क
र्मणि द्वितीयेति व्याकरणस्मृत्या साध्यत्वे विहितया द्वितीयया स्तुवामेव प्राधान्यावगते कथं सम्मार्गस्य प्राधानकर्मतेति वाच्यं ना
हि साध्य द्वितीयार्थ इति व्याकरणेन गम्यते ईप्सिततमत्वस्यैव ततोवगतेः अभिचारेण च न साध्यत्वं द्वितीयार्थो लोके हि तावद्दूलजा
द्वि घंटाकान कुर्विति सास्ति प्रयोगः वल्वजैस्तृणविशेषैः शिखंडकान कुर्विति गम्यते न वल्वजानां शिखंडतया साध्यत्वाभावेपि द्वि
तीया दृश्यते । अतो अभिचारेण साध्यत्वं द्वितीयार्थः । प्रस्तुत साधनत्वमेवाव्यभिचाराद् द्वितीयार्थः । वल्वजानां शिखंडकसाधनत्वात्स
क्तुं जुहोतीसच सक्तूनां च होमसाधनत्वात् ॥ न च कटं करोति घटं करोतीत्यादौ घटादेरसिद्धस्य साधनत्वसंभवाच्चाभिचारेण तस्यान तत्र द्विती
यार्थ इति वाच्यं । एवमाकारः घटादिकर्तव्य इति बुद्ध्या पुरुषेणानंतरमेव तत्र कृते तस्य बुद्धिस्थत्वेन तस्यापि साधनत्वसंभवात् तत्र
स्रगादिसाधनकस्य सम्मार्गविधानात् दृष्टोपकाराभावाच्च प्रधानकर्मत्वमेव सम्मार्गस्येति पूर्वपक्षः प्राप्ते । धर्ममात्रे तु कर्म स्यात् इति
दृजेः प्रयाजवतानुशब्दोवधारणे । तथा प्रत्ययशब्दोपि मात्रं कार्त्स्न्येवधारणे इत्यमरः । धर्मः अदृष्टार्थकर्म धर्म एव धर्ममात्रं मपूर्वत्वं स

काद्गित्वात्समासः ॥ अथवा संशयमात्रमेतदित्यत्र महाभाष्ये मातृशब्दः अतालिकलेदृष्टः अतालिकलपशपालीकलं इहकृष्णसदृशप्रमाणा
गोचरत्वेन रूपमदृष्टत्वं विवक्षितं अदृष्टो धर्मः धर्ममात्रं पूर्ववत्समासः ॥ दृष्टोपकाररहितमदृष्टार्थकं कर्म धर्ममात्रं केवलादृष्टार्थकर्मन
तुल्यविषकद्दृभयरूपमित्युक्तं भवति तथाविधसन्मार्गविधायकत्वात्तेसन्मार्गः प्रधानं वेत्रधानकर्मस्थानकृष्णकर्मकृतः अत्रेर्द्दजेः
दृष्टस्योपकारस्य सन्मार्गेद्दनुसजेः ॥ एवं श्रीहितेत्रासति अजमुमुत्तानि ह विरभिमन्शाति गीर्हपत्यमुपतिष्ठत इत्यादिषु प्रयं ॥ सिद्धूतयति:
तुल्यमश्रूतिलाद्दतरेस्य धर्मस्य तत् वा शब्द एवार्थः सन्मार्गादितरेः अवघातादिभिः ॥ सधर्मस्यासमानसाधारणो धर्मो यस्य तत्स्य धर्म
धर्मादनिचि केवलादिस निचि समासान्तः ॥ गुणकर्मेत्युक्तं भवति कुतः ॥ तुल्यमश्रूतिलात् ॥ तुल्याद्वितीयाश्रुतिर्यस्य तत् तुल्यमश्रूतिः ॥ नसभाव
त्त्वं तस्मात्तुल्यमश्रूतिलात् ॥ अयमत्राशयः ॥ कर्तुरीप्सिततमं कर्मेति सूत्रतो यद्यपि न साध्यत्वं द्वितीयार्थस्तिलभ्यते तथापि तथायुक्तं चानी
प्सितमिति सूत्रान्तरारम्भः ॥ यथा ईप्सिततमं साध्यात्तद्पापत्रसंक्रेपायुज्यनेनथा अनीप्सितमपि साधारणेपेतान्क्रियायुक्तं कर्मसंज्ञं स्यात् ईप्सिता
नीप्सितसाधारणं साध्यत्वमेव कर्मत्वं तच्च द्वितीयेत्युक्तं भवति ॥ न चैवं सति साध्यं कर्मस्येतावतैव सिद्धावीप्सितानीप्सितयोः एषपग्रपादानमनर्थकमिति वा
सा ॥ एवं सत्यग्नेर्माणवकं वारयतीत्यत्र माणवकस्य कर्मसंज्ञापवादेन वारणार्थानामीप्सितः इत्यपादानत्वापत्तौ पुष्पात्तिस्वह वेतीत्यत्र च पुष्पाणास्य
हेतीप्सितइति संप्रदानत्वापत्तौ तन्निवृत्तये प्रकृतेप्सितस्य कर्मसंज्ञाविधानाय कर्तुरीप्सिततमं कर्मसत्स्यावश्यकत्वे सति विषं भुङ्क्ते ग्रामं गच्छंस्तृणं स्पृ
ग्रानीसाहेहेष्योपेशपोरपि संग्रहार्थं तथायुक्तं चानीप्सितमित्युक्तस्यावश्यकत्वात् ॥ न च साध्यं कर्मेति पक्षेप्यस्थात् अभ्यतिसत्र द्वितीयायां साधनत्वे अ
धिइतेन अधिगतिस्तति अथ्याल्लवावैकुंठं हति इत्यत्र चाधिकरणत्वेलक्षणाया अवश्यकत्वान्नीप्सितेपि लक्षणा किं न स्यादिति वाच्यं तन्साधारण

प्रवृत्तिनिमित्तस्यकेनापिप्रकारेणशक्यत्वेनतत्रागतस्यसत्वस्यणस्वीकारेपिसंभवन्मात्रविषयात्तगमस्यसत्क्रमतश्चितत्वात्।इत्थंच लोकेसाध्यत्वेद्वितीयायाः
प्रयोगः कटंकरोतीत्यादौ।नत्वत्रसाध्यत्वंद्वितीयार्थइतिशक्यतेवक्तुंअसिद्धत्वात्।नचबुद्धिस्थत्वेनसाधनत्वसंभवः।बुद्धिस्थत्वंहिबुद्धेर्विषय
त्वमात्रं।नतुवस्तुसद्भावः।अतः कथंतन्मात्रेणासिद्धत्वनियतंसाधनत्वंसंभवति।तथाचेदेपिव्रीहीनवहंतीत्यादौवैतुल्यादिविशिष्टत्वेनसा
ध्यव्रीत्यादौद्वितीयाप्रयुज्यते।ततश्चप्रयोगान्गृहीतव्याकरणानुसारेणसाध्यत्वमेवद्वितीयार्थइत्यध्यवस्यामः।यद्विद्वितीयायाःसा
धनत्वमर्थःस्यात्।तर्हिपरशुनाछिनत्तीत्यत्रपरशुशब्दात्द्वितीयास्यात् करणत्वेतृतीयाविधानंचानर्थकंस्यात्।नचसाध्यत्वोपलक्षितसा
धनत्वंतृतीयार्थइतिनोक्तदोषः।परशोस्तत्रसिद्धरूपत्वादितिवाच्यं।लाघवेनसाध्यत्वस्यैवद्वितीयावाच्यत्वोपपत्तेः।ननुद्वितीयायाःसाध्यत्वार्थक
त्वेपिसक्त्वादीनांशेषित्वप्रसाधकाभावात्कथंसम्मार्गादीनांगुणकर्मकत्वं।गुणकर्मकत्वं।गुणकर्मकत्वस्यपारार्थ्यशेषत्वनियतत्वात्।पारार्थ्यप
रोद्देशप्रवृत्तकृतिव्याप्यत्वंतच्चसमीहितपुरुषव्यापारगोचरीभूतेनयेनसमीहितंसाध्यतेतत्त्वंसमीहितपुरुषव्यापारोद्देश्यसमीहितत्वंच
शेषित्वं।नचैतत्साध्यत्वाभिधायिन्याद्वितीययोच्यतइतिवक्तुंशक्यतेसक्त्वं।नशेषित्वंद्वितीयायासाक्षात्प्रतिपाद्यं।किंतुविधीयतएवतद्धर्म्यंतत्र
द्वितीयायाःसाहाय्यकमात्रंतच्चासाध्यत्वाभिधायित्वेपिसंभवतिप्रवर्तनात्मिकाशब्दभावनाहिविधिः।प्रवृत्तिहेतुव्यापारःप्रवर्तना।तयाचनर
समीहितसाधनादन्यत्रचेतनःप्रवर्तयितुंशक्यतइतिविधिःस्वस्यप्रवर्तनात्वसिध्यर्थंस्वमाप्यायाअर्थभावनायाःकर्तृव्यापारात्मिकायाःस
मीहितभाव्यकत्वंगमयन्नभावनाकरणस्यसमीहितोद्देशप्रवृत्तकर्तृव्यापारगोचरत्वंगमयतितत्रभाव्यंसामान्यात्मनाभावनयाअवग
तंतद्विशेषरूपेणतुस्वर्गादिपदेनैवगम्यतइतिनतद्वैयर्थ्यं।ततश्चसमीहितत्वंसाध्यत्वंचेतिद्वयंशेषित्वबोधेअपेक्षितंतत्रद्वितीययासाध्य

तं विधिबलाच्च समीहितत्वं गम्यत इति द्वितीयास्तद्वीन विधितश्चोदितत्वबोधस्संभवति न तु विधिना समीहितत्वं बोध्यत इत्यसमुक्तं स्वर्गादीनां क्रतुसा
धनत्वेन समीहितत्वस्य सिद्धत्वात्तत्र तेषां समीहितत्वात् । स्वर्गादिसमीहितमित्येवं रूपेण बोधनेऽकर्मपदरहितस्य मार्गविधेरसामर्थ्या
च्चेति चेत् नैष दोषः । यद्धि वस्तुतस्समीहितं स्वर्गादि तस्य सम्मार्जनादिक्रियोद्देश्यत्वमेव विधिना बोध्यते एवं च क्रतुसाधनत्वेनेच्छाविषयस्या
पि स्वर्गादेरुद्देश्यत्वं विना पुरोदेशप्रवृत्तरूक्तिमात्यत्वसम्पादनपारार्थ्यं सम्मार्गादेर्न संभवतीति न तस्य धर्म्यं विधिगम्यं समीहितत्वमुद्देश्यत्व
पर्यन्तमाक्षिप्यते । न लिप्साविषयत्वमात्रमिति न दोषः । यत्तु साध्यत्वं वा विद्वितीया नास्ति यजेत स्वर्गकाम इत्यादौ तत्र साध्यत्वमुद्देश्यत्वं वद्ध्य
मपि विधिन एवावगम्यत इति ध्येयं । वस्त्वजांच्छिरखंडकानकुर्वीत सा दोववल्वजातीनां शिरखंडाद्याकारेण साध्यत्वान्न व्यभिचारः । कथं तर्हि संस्कृ
जुहोतीत्यत्र द्वितीया तिर्व्याहत्ता शंक्यं निराकरोति । द्रव्योपदेश इति वचनं दर्थताज्ञोक्तवानस्य च शेषभूतत्वात् । सक्तुद्रव्यस्य होमं प्रति साधन
त्वेन गुणभूतस्य द्वितीयया उपदेशः । कथमिति चेत्तन्नाकृतः । तदर्थत्वात्सक्तुद्रव्यस्य होमार्थत्वात् । होमं प्रति साधनत्वेन शेषत्वं यागव्यापा
भावेन तस्य द्रव्यस्य तच्छेषित्वासंभवात् । यद्धि विधिव्यापारं विनैव पुरुषस्य समीहितं तस्य विधीयमानसाधनं प्रत्युद्देश्यत्वमात्रं विधिगम्यं न
तु सक्तुद्रव्यं प्रमाणान्तरेणाभिलषितं येन विधित उद्देश्यत्वसिद्धिमात्रमपेक्ष्येत । तस्मात् न प्रतीयते नैतदस्ति सक्तुद्रव्यस्य भूतोपयोगित्वेन प्रतिपाद्य
ते पीवाभावयुपयोगित्वेन क्रतुसाधनतया वाप्यभिलषितत्वाभावात् । अतो भाव्यत्वेनान्वयासंभवेन साधनत्वेनैव सक्तुद्रव्यस्यान्वयो वाच्यः
द्वितीया च लक्षणया तत्र निर्वाह्या । आरोपितसाध्यत्वविवक्षया वा । अत एव विवक्षातः कारकाणि भवंतीति साध्वि सस्थाली पचतीत्यत्र द्वि
तीसादि साधितं परा भाव्या हो । स्वर्गादेस्तु क्रतुसाधनरूपेणाभिलषितस्य विधीयमानसम्मार्गं प्रत्युद्देश्यत्वं विधिगम्यमवसंध्येयं सम्मा

गिमावनापासमीहिनमाप्यार्कोस्मिरणपांमखलेनान्वयउचितः। न तु स्तुगादेः साध्यत्वम् स्वरूपेणासंभवति नाप्युपकारावेलेन। अवहननादिव
मवैतुण्यरूपोपकारवदिहोपकारेऽनुपलब्धेः। ननु अहननस्यैवेतितस्य च स्तुगादेः शेषभूतत्वात् अदृष्टोपकारद्वारेण तत्साधकं सम्मार्ग
प्राप्तत्वात् अदृष्टोपकारविशिष्टत्वेन स्तुचां सम्मार्गसाध्यत्वादिति। पावत्त अदृष्टोपकारोऽस्ति ते दृष्टान्तयेति लोकवदितिय चालोके
नोगत्विकारणां एजतदमासाहानां यामसभ्यागतानां नीएजनरूपपर्यग्निकरणेन अदृष्टोपकारः कि पतेतन्नह्वत। न च सम्मार्गस्य गु
णकर्मत्वे प्रधानगुणकर्मप्रधानस्यतया व्याप्नुतीमा स्त्रीसमाना मितिवाच्यं। न हि पर्युदिभ्य न विकीर्षितरसादिना सूत्रभागेन प्रधान
गुणकर्मणोर्लक्षणेऽकच्यते। अनपेक्षितार्थत्वप्रसंगात्। अपूर्वसद्भावासद्भावविषयविवेचनमेव हि तत्र क्रियते दृष्टोपकारिषु पूर्वभावास्मितदन्य
त्रेतत्सीति तावन्मात्रस्यैव भावाद्यधिकरणापवादत्वेन प्रतिपिपादयिषितत्वात्। तथा च दृष्टोपकारिगुणकर्म अपूर्वानाधायकं अदृष्टोपकारि तु प्रधानक
र्म अपूर्वाधायकमिति तदर्थः पर्यवस्यतीति न दोषः। फलभावनाकरणयागादिसाधनद्रव्यगतदृष्टादृष्टान्यतरसंस्कारजनकं कर्म गुणकर्मीय
था अवघातादि सम्मार्गादि च। फलभावनाकरणयागादेरुत्पत्तेरपेक्षणा साक्षादपूर्वाधायकं कर्म प्रधानकर्मेति तु तल्लक्षणे वोध्ये तस्मात् सम्मा
र्गादि गुणकर्मेति सिद्धं। प्रयोजनं पूर्वपक्षे स्तुगभिसाधने यस्यकस्यचित् सम्मार्गः। वैशेषेण तु च सम्मार्ग इति तु सम्मार्गानन्तरं सिद्धं। ते ते कर्मि
साम स्तुत् इति सम्मार्गाधिकरणं। संति ज्योतिष्टोमे स्तोत्राणि बहिष्पवमानेन स्तुवते आज्यैः स्तुवते माध्यंदिनपवमानेन स्तुवते पृष्ठैः स्तुवते आ
र्भवपवमानेन स्तुवते यज्ञायज्ञियेन स्तुवत इति। अतिच शस्त्राणि आज्यं शंसति प्रउगं शंसति मरुत्वतीयं शंसति निष्केवल्यं शंसति वैश्वदेव
शंसति आग्निमारुतं शंसतीति होतृव्यपदेशात्। तथा मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानां मध्ये केचन स्तुद् इति षट् शस्त्राणि प्रगीतमंत्र

साध्यगुणत्वेनेष्टगुणाभिधानं स्तोत्रं अप्रगीतमन्त्रसाध्यगुणत्वेनेष्टगुणाभिधानं शस्त्रं अभिधानं शाब्दबोधमत्र तु न तु गुणगुणिसंबंधाभिधायकप्रगी
तमन्त्रोच्चारणं स्तोत्रं अप्रगीततथाविधशब्दोच्चारणं शस्त्रं तदेतानि स्तोत्रशस्त्राणि किं तु सदेवतासंस्कारार्थानि गुणकर्माणि उत अदृष्टार्थतया
प्रधानकर्माणीति संशयः तत्र पूर्वपक्षपतिः स्तुतशस्त्रयोस्तु संस्कारो वा स्याद्देवताभिधानत्वात् तात्स्तुते इति भावे क्तः कर्तरि षष्ठी स्तोत्र तेन वा
गुणमात्रद्विवचनं स्तोत्रशस्त्रकर्तृकः प्राकधापरनामधेयस्तात तात्मकः प्रकाशनरूपः संस्कारः कर्मसमवेते इन्द्रादौ स्यात् कुतः देवताभिधा
नत्वात् अग्निर्मूर्धेत्यादिमन्त्राणामिन्द्रादिदेवतागुणवर्णनपरत्वेनामपि मुख्यतया तत्सामर्थ्यविषयात् देवताभिधायकत्वात् तेन गुणप्रकाश
कानामप्येषां गुणगुणिप्रकाशनदेवतासंस्कारार्थत्वादिति यावत् । यथा अग्निर्मूर्धा दिवः ककुदित्यादिना अग्निसुमूर्धत्वादिगुणप्रकाशने सत्यपि न तत्र तासंयर्थ्यं किं तु
गुणिप्रकाशनदेवतासंस्पर्शतद्वदिहापि गुणप्रकाशनमन्त्रीकरस्तत् स्तुत्यत्वेन गुणिप्रकाशनदेवतासंयद्दृष्टार्थतया युपेयं गुणसंबंधकीर्तनमात्रे
णास्तुतित्वं चोपपद्यते । तु शब्देन नरोऽयं संग्रामादिविषयमपि संग्रामादिनाप्युपस्तयागवदपूर्वधायकं स्तुतशस्त्रे तु देवतासु प्रकाशनरूपदृष्टसंस्का
राधायक इति तस्माद्गुणकर्मणी स्तोत्रशस्त्रे इति अथवा स्तुतशस्त्रयोरिति विषयनिर्देशः स्तुतं गुणगुणिसंबंधाभिधायकप्रगीतशब्दोच्चार
णां अप्रगीततथाविधशब्दोच्चारणं शस्त्रं स्तुतत्वेन शस्त्रत्वेन वा गुणमात्रद्विवचनं बहिष्पवमानेन स्तुवते इत्यादिवाक्ये आज्यं शंसति इत्यादिवाक्ये च ।
तिपावनासंस्कारः दृष्टः प्रकाशनरूपः इन्द्रादिषु गम्यते इत्याख्येयं देवताभिधानत्वादिति तु पूर्व वैवमाख्येयं पुनः केचन । स्तौति शंसत्योः शाब्द
बोधप्रधानत्वे हि तत्र उपपद्यमानस्य दृष्टसंस्कारस्य कल्पनेति इन्द्रादिदेवतास्वदर्शनेन एवं पृष्ठाद्युत्तमेषु स्वरूप एव । न च प्रकाशनमेव तत्र दृष्ट
संस्कार इति वाच्यं न तस्य शाब्दबोधादन्यत्वेन ततः उत्पत्त्यसम्पन्नेः शाब्दबोधात्मकधापरनामधेयस्तात तात्मकदृष्टसंस्कारो देवतासु स्यादिति

याख्यानं तु क्लिष्टमेव। ज्ञानविषयतातिरिक्तज्ञाततायास्सर्वासम्मतत्वात्। किं च स्तौतिशंसत्योः प्रगीताप्रगीतमन्त्रसाध्यबोधपरत्वं वदन् प्रष्टव्यः शा
ब्दबोधः किं श्रोत्रगतो विवक्षितः प्रयोक्तृगतो वेति नाद्यः जानाति बुध्यत इत्यादिधात्वोरिव स्तौतिशंसत्योः धात्वर्थरूपाश्रयत्वं गुणवत्बोधाश्रये श्रोतर्यपि स्तौ
तिशंसतीति प्रयोगापत्तेः। न चेष्टापत्तिः अयं राजानं स्तौतीति एजा चतस्तुतात्स्वप्नीति स्तोत्रस्य प्रयुक्तिभेदानुभवविरोधात्। न द्वितीयः स्तोत्रगं
तगुणविषयकज्ञानस्य प्रयोक्तरि सत्वेपि श्रोतरि तदभावेन तस्मिन् स्तुतत्वं तदभावेपि स्तेः अभिलाषम् एनोनमह इत्यादिमन्त्रात्संबोधनविभक्त्या
इन्द्रादिदेवता प्रतिगुणवत्त्वज्ञापनपराणां शाब्दमर्यादया प्राप्तौ कोहि शाब्दबोधजनकता समता या मन्त्राधिकरणे रूपितत्वात् एवं हि गो
ज्ञोनं गयपथेषु कक्षस्तुवतीति शाब्दबोधमुत्पाद्यनामपि प्रयोक्तृणां श्रोत्रतप्रसिद्धेः स्वस्तस्तुसन्दितेजिह्वे विघातानुरूपमानेः स्तवमुखनर
बृहिजयतामिव दुन्दुभिजिह्वाकाकतिवीररूपेण पतेत्स्तोत्राय सत्सन्नीसाक्षीणां स्तुते रूच्चारणप्रधानत्व एव सामञ्जस्याच्चान्यत एवेन्द्रादिकरणा
रं भेगुणवचनं स्तवनं शंसनं चेति भाष्ये गुणगुणिसंबंधकीर्तनं च स्तुतिरिति वार्तिके शब्दोच्चारणमात्रस्य स्तुतित्वाव्यपदेशादिति तदनन्तरवा
र्तिके अभिधानरहितशब्दोच्चारणात्पांस्तुतित्वं हीयत इत्यर्थः इति न्यायसुधावसंगच्छते। अभिधानशब्दोच्चारणस्य स्तुतित्वाभावो स्यादभिधान
घनशब्दोच्चारणस्तुतिरिति लभ्यते। न चैवमुच्चारणस्य स्तुतित्वेपि घटमीस्तुवन इति कथं कपनानामप्यंचास्तत्साधारणोच्चारणस्य पुरुषनिष्ठ
त्वेनाश्रयनिष्ठत्वाभावादिति वाच्यं न हि केवलं शब्दोच्चारणमेव स्तुतिः किन्तु गुणगुणिसंबंधाभिधायकशब्दोच्चारणमेवास्मात्तत्र विशेष
णीभूतगुणगुणिसंबंधाभिधानं चेतनप्रतीतमुक्तशब्दनिष्ठव्यापाररूपं शब्दोर्थमभिधत्त इति व्यवहारदर्शनात्। एवं च कवतीनाम्
च्चारणात्मकपुरुषव्यापाररूपविशेष्याश्रयाधारत्वाभावेपि विशेषणीभूतगुणगुणिसंबंधाभिधानरूपशब्दनिष्ठव्यापाराधारत्वपाद

पसप्तमीयुज्यते प्रयोक्तुः। उक्तं वार्त्तिके गणानुगुणसंबंधाभिधानक्रियायाः अप्रसृतेः स्वात्कर्तृतोक्तिः सप्तमीयुज्यत इति विवृतं बोद्ध्यापि तु
धायां गुणत्वज्ञापनेस्तुतिः ज्ञापनेव लानहेतुर्व्यापारः। सथाक्षाराणामभिधानारम्भः पुरुषस्याप्यभिधायकाः सतोच्चारणारम्भः तत्र पु
व्यापारे स्मरणमकर्तृत्वेनाधारत्वायोगेप्यभिधानारम्भव्यापारे विशेषणे अत्र स्मरणाकर्तृत्वेनाधारत्वानन्तु त्वेन पुंव्यापारे च्चारणा
धारत्वं युक्तमिति तस्मात् गुणानुगुणसंबंधबोधफलकप्रगीतशब्दोच्चारणास्तुतिः अप्रगीतनतुच्चारणा शंसनं शब्दबोधश्च श्रोत्रनिष्ठ
एवं द्रव्यदेवतापश्चात्त्रश्रोतारः तेषां च विग्रहादिपंचकं जैमिन्यभिमतमेवेति नवमे वक्ष्यते। एवं च शास्त्रीयगुणाभ्याधानं तवर्णसंधानसंगच्छ
ते शंसने प्रयोक्तृगतशाब्दबोधप्रधानत्वे हि पूर्वपूर्वस्याप्यबोधाववोधे व्याप्त इति तस्य प्रयोक्तुरजनोत्तरस्याप्यवस्थानत्वात्पपत्तिरि
त्यादिमन्त्राधिकरणे बोध्यम्। अत एवमेतादृशे स्तुतत्र शास्त्रे देवताप्रच्छिन्नमकाशनद्युपदृष्टार्थं गुणकर्मणोरिति प्राहेति सिद्धांतयति। अपूर्व
नतपक्षप्येत देवतानामचोदनार्थस्य गुणाभ्युनतात्। देवतानामाद्र द्रातद्भूतानां क्रियार्थत्वनयायाम्नायः आम्नायस्य क्रियार्थत्वादितिपर
जैमिनिए वर्योपपन्ने अत एवोपनिषद्भागस्य विधिशेषत्वं जैमिनियुक्तत्वेन पूर्वपक्षपापासंवादरायणः शेषत्वापुरुषार्थपातेयथा
मेधितिजैमिनिरीमीसांसानां वा तत्। तद्देवमध्ययनविधेः प्रयोजनवदर्थावबोधपर्यवसानं भाट्टप्राभाकरानुमतमभ्युपगम्य व्याख्या
नावस्तुतस्तु स्वाध्यायविधिरक्षरप्राप्तिपाठमात्रकः। अर्थावबोधत्वादिकफलं न च तत्र स्वाध्यायविधेर्व्यापारः नन्वप्रयोजनवद्
र्थावबोधे तदेतत्पुरुषार्थानुशासनसूत्रेष्वेवमस्यापि ततस्यातिरिक्तगुणेः माध्योराहृतानुगाहसतद्दृष्टिमत्र एव सम्पारब्धासा
नः। वेयमर्थनिर्णयविधेः पुमर्थावसानात्। सर्वत्रविधेः पुरुषार्थपर्यवसायत्वनियमात्पुरुषार्थभूतं प्रत्यर्थावबोधमध्याय

नविधिप्रयुक्तं भट्टगुरुमते। ननु सकृत्स्वाध्ययनादर्थप्रतिपत्त्यनुपलभ्यते तत्राह। सविचारमाक्षिपेत्। सः अध्ययनविधिः फल
वदर्थावबोधसिद्ध्यै तदुक्तं विचारमाक्षिपेत् स सेत्स्यति। ननु विधेयतदुपकारिणोरेव विधिः प्रयोजकस्तथा तस्य विचारं कथ
मध्ययनविधिः कल्पयिष्यतीत्यत आह। अविधेयानुपकारिणो विधानाद्वृत्तिवत्। व्रीहीनवहन्तीत्यत्रावघातमात्रमुपयते न तु तण्डुलनि
नस्यात्तदर्थत्वात्। नापि सा विधेयावघातोपकारिणी। अन्तरेणापि तत्सत्त्वं मुसलेनावघातमात्रेणावघातसिद्धेः। तथापि कार्यं तण्
डुलनिष्पत्त्यै स विधिरावर्जयति यद्वदाक्षिपति तद्वत्स्वाध्यायविधिरप्यकार्यभूतफलवदर्थावबोधसिद्ध्यै विचारमाक्षिपतीति नन्व
ध्ययनमात्रात्फलवदर्थबोधानुदये पिपासाकरणादिसहकृतादध्ययनादेव तत्सिद्धेः संभवात्। किमर्थं विचाराक्षेप इत्यत आह। साङ्गाध्य
यनानन्तरं वेविचारो विशेषाध्ययनाभ्यर्थगतविरोधपरिहाराय विचारः अवश्यमाक्षिप्यत इति भावः। एवञ्चाभीष्टं प्रतिपन्नतयति। प्राह
स्तु गवादिवस्तुयथार्थतां स्वाध्ययनविधिस्तदं नः। यथा फलमनन्तशीर्णादिहेतवो गवादयो विपुरुषेरितोऽनन्तता यथार्थबोधहेतोरस्य प्रा
धेः पुरुषार्थत्वादध्ययनविधिरस्मरणफलावसानो गन्तव्यः नन्वेवं स्मरणावाहे पुरुषार्थतस्यार्थावबोधप्रयुक्तत्वे तद्वैयर्थ्यमस्मत्पु
रुषार्थत्वाद्ध्यानस्यैव विधिः किं न स्यादित्यत आह फलवदर्थावबोधात्तेऽध्ययनाकांक्षा बोधस्य हि फलं कर्मानुष्ठानं तथा च
ब्राह्मणस्य राजसूयिकमन्त्रब्राह्मणाध्ययनं न स्यात्। फलवदर्थावबोधाभावेनाध्ययनपरत्वाभावे नायं दोषः इत्याह। दृष्टफलप्राप्तिजं यथार्थं ब्राह्म
यत्नाद्यर्थसमर्थः। न च विधेर्बोधात् तल्लाभाभावे अर्थावबोध एव न सिध्यतीति वाच्यं। प्रमाणस्य प्रमेयबोधकत्वस्वाभाव्यात्। अर्थावबो
धस्य फलत्वमनुपपन्नं चेत्साह। सोकामः प्राग्वाध्ययनाभावयोः। बोध्यस्याग्निहोत्रादिलक्षणस्यैव साध्यस्य अध्ययनात्मा कस्याध्यो

पासनवत् पित्राद्युपदेशात एवभावेनेशानेसतिसिद्धानसादेवसः अर्थबोधोनकाम्यः अभावेनेअतावेतुसति कामपित्रुमप्रवृत्तः शास्त एवेष्टा
नियमात् ननु सामान्यतोज्ञाते विशिष्टाज्ञाते इच्छा संभवति। किंच पित्राद्युपदेशतो विशिष्टावगते। पित्रोपदेशिकत्वानस्य प्रामाण्य
निश्चयायपुनर्बोधकामनायुक्तैवेत्यत आह इदे शायोगात्। अनिश्चितेनादि विशेषवृत्तानामानगतावुद्देश्यत्वाविशेषणाकारेणोद्देशा
अनंततात्। सामान्याकारेणोद्देशे सामान्यज्ञानमेव विधिफलं स्यात्। ननु विशेषज्ञानं अनोर्थावबोधसूत्रउद्देश्यत्वं नयुज्यते। ननु
ध्ययनविधेः प्योवबोधांततोभावे वृद्धस्यकथं स्वार्थतासपर्यावगमः तत्राह। तास्यवृ शब्दस्तात् उपक्रमादिलिंगगम्यतात्पर्यशब्दवृत्ता
देवासिध्यतीसर्वः। एवं चपस्य स्वर्गादिकं लेचोदकबाधकप्रसंगात्। इहतुमाह इविभिगनमहत्वगुणामतेसागवोधकेनकिंचित्सश्या:
यः तस्मान्महे इत्यादि शब्दघटितमंत्रकस्तोत्रशस्त्रत्वंचप्रकाशत्वेनशंकोभीसूक्तत्वंस्यादेव अतोनगुणकर्मत्वंस्तुतशस्त्रयोः किंतु
प्रधानकर्मत्वमेवास्यादेवंहि गुणकर्मत्वे स्तुतशस्त्रयोरस्तु नचैवं सतिमाहेन्द्रग्रहप्रयोजिसन्निधापाठात्मेते इमंत्रकस्तोत्रशस्त्रयोरुत्कर्षस्यादि
तिवाच्यं। इज्यः प्रजेः नवकर्मसान्निध्याद्बाधश्रुतेः ऐन्द्रमंत्रस्यमहेन्द्रप्रतिपादनासमर्थत्वेनपत्रे इत्तनोत्कर्षस्यसामर्थ्यरूपलिंगवशेन
कर्मसन्निधीबाधितानापितु युक्तत्वात्। लिंगस्यक्रमसन्निध्यपेक्षयापावल्यत्वात्याधीयेअतिलिंगादिसचेनिरूपपिप्पमाणबाद्धिति
एवं पक्षीप्रसवतिष्ठते। यत्रेतिवार्थवत्वात्स्यात्। वाशब्दप्रसवाख्यितो। यत्रशब्देनतदादिवाक्यंलक्ष्यतेयत्रे इत्तत्रे इमंचमंत्रकस्तुतशस्त्र
योरुत्कर्षोस्तितिक्रमः कुतः अर्थवत्वात्। ऐन्द्रमंत्रकस्तुतशस्त्रयोर्माहेन्द्रग्रहयजेत्पन्नेवयाभीयदेवताप्रकाशनसमर्पतेनप्रयोजन
वत्वात् अतस्तुतशस्त्रयोर्गुणकर्मत्वमेवस्यात्। नन्वैन्द्र्यादिमंत्राणां येषामन्यत्रप्रयोजनं संभाव्यते तेषामुत्कर्षस्संभाव्यतां। येषांतुमंत्रा

णां च प्रकृतकर्मसमवेतेन देवताप्रकाशनसामर्थ्यमन्यत्र वनास्ति प्रयोजनं तेषां कथमुत्कर्षसंभवः अतस्तेषां दृष्टार्थत्वमेवास्ति छन्दाप्युपे
यं यथा आग्निमारुतशस्त्रे यामा अश्शंसति पिबा अश्शंसती स्यादिति विहिताः कुशुंभकसूक्तं शंसति अहसूक्तं शंसति मण्डिकसूक्तं श
सती स्यादिति विहिता अतएषामदृष्टार्थत्वे च तन्न्यायेनैतेषामपि सर्वेषां लुप्तस्त्राणामदृष्टार्थत्वेन प्रधानकर्मत्वेनैवोच्यते तेति सिद्धं
तीशंकते नतान्याप्रातेषु तुशब्दो व्यावर्तयति आग्निमारुतादन्यत्र तेषु केषुचिद्धाम्नादिमंत्रेषु प्रकृतकर्मणोन्यत्र नैवार्थवत्त्वमस्ति अ
तः प्रकृतकर्मण्येवादृष्टार्थत्वं वक्तव्यं तन्न्यायेन सर्वेषामपीति सर्वपूर्वपक्षीपृ इति प्राप्ते दृश्यते यामादीनामुत्कृष्यनामन्यत्रार्थव
त्त्वदर्शनात् इत्यर्थः यामपि आग्निमारुतीय मधयतमहापितृयज्ञशास्त्रे सभवस्यार्थवत्ता मद्दिकसूक्तस्य महाव्रतीयनार्थवत्त्वं तत्र मद्दिकेन विकर्षती
ति विधानात् अन्नसूक्तस्य राजसूये अर्थवत्त्वं तत्राहं सैष्मिते निविधानात् तामण्डिकसूक्तस्य यपेका दृशिन्यामर्थवत्त्वं तत्राखुस्तत्य प्रभु इति ब्रू
यादिति विधानात् कुशुंभकसूक्तानांतु वाचस्तोमे आश्विनशस्त्रे वार्थवत्त्वं सर्वाश्च च सर्वाणि पञ्जर्षि सर्वाणि सामानि वाचस्तोमे पारि
प्लवं शंसतीति विधानात् एषां रिचयप्रत्येयस्याश्विने शस्यमानेसूक्ते योनाविभवन्ति सर्वा अपि हि शतयीरनुब्रूयादिति विधाना वाक्
स्वेद शाकलसंहिता बाष्कलसंहितावदशतमत्रिरुच्यते दशमण्डलात्मकसातत्वेन सामर्थ्यतो शास्त्रत र्थे अनयाश्विनशस्त्रे वाचस्तोमे चो
क्तः शूनामप्येदृष्टार्थत्वमेव स्यादिति चान्यं धर्मिन्दृष्टार्थत्वे सत्यपि सत्याग्नमोत तथा अपि तु मन्त्रवित्त्वात् तस्मादेषां दिमन्त्राणां प्रकृ
ते महद्रादिग्रहदेवताप्रकाशनेऽसामर्थ्यप्यन्यत्रोत्कर्षेणार्थप्रकाशनार्थत्वसंभवात् प्रकृतकर्मणीमस्तु तत्र शास्त्रे इति प्राप्ते सिद्धानी
ताकर्मत्व मुख्यहेषं ब्रूवन् प्रधानकर्मत्वं समर्थयते अपि वा श्रुति संयोगात् प्रकरणे स्तौतिशंसती क्रियोसत्तिं विदध्याताम् अपि

वेतिपत्तव्यात् तेन गुणकर्मणी स्तुतशस्त्रे। कुतः अर्थेन संयोगात् न हि स्तौति शंसती गुणाभिधानमात्रेण वर्तेते किं तु प्राधान्येन गुणाभिधाने अत
एव देवदत्तो वक्रकेशान् इति विकारं स्तौति इत्यपव्यवहारं इति लोके। ननु वक्रकेशान् देवदत्तमानयेति विकारमपि अतो गुणप्रकाशनार्थत्वे स्तौ
ति शंसती ति प्रतिवाद्यप्रसंगात् इह दृष्टप्रयोजनमपि गुणा देवताप्रकाशनं प्रति संपाद्यं दृष्टार्थत्वमेवाश्रयितुं युक्तं एवं च सति प्रकरणे
प्रकृत एव कर्मणोः स्तौति शंसती स्तुति शंसने किंयोः सती लकार्थः दृष्टाः संनिविदध्यातां। साध्ययोर्वा बाधकाभावात् गुणा देवताप्रका
नार्थत्वे तु स्तौति शंसती पञ्चगुणिनी देवता तत्रैव लकारमर्थप्रकाशनं साधयेतां ततश्च लिंगमनुगृह्येत अतिस्तु बाध्येत क्रमसन्निधी
व बाध्येयातां अदृष्टार्थत्वे तु माहेन्द्रं गृह्यते यजाव विष्णो एन्द्रं मन्त्रकः स्तुतशस्त्रयोः समवेशः संभवान्न लिंगक्रमसन्निधीनामपि बाधः नापि अप्रकरणे
स्मात् प्रधानकर्मणी एव स्तुतशस्त्रे तेषु केनतरमाहुः शब्दपर्यालोचनयाद् दृश्यते स्तोत्रशस्त्रोऽग्निष्टोम इति संख्याशब्देन स्तोत्रशस्त्रकर्म
णां पार्थक्यमवगम्यते तेन चेत् अदृष्टार्थत्वे घटते प्रकाशनार्थत्वे तु प्रकाशनस्यैकत्वान्न संख्योपपद्यते विशेषाश्रयणेऽपि च अन्यत्वप्रतिप
त्तिरिति प्रयत्नाः अदृष्टार्थत्वे तु पूर्वभेदमाश्रित्य संख्योपपत्तिः अथवा अर्थप्रकाशनार्थत्वेऽपि उत्पत्तिवाक्यशब्देनावगम्यते यत्क्रमस्तेनोपप
द्येत इति स्यात् ऐन्द्र्यं इत्यतोऽपि स्तुतशस्त्रे प्रधानकर्मणी इत्याह। अनर्थकं तत् वचनं गुणकर्मत्वे अन्यत्र श्रुति आग्नेयाय अभवन्तीति प्रत्यक्षचोदनया वाग्ने
यी नाम चा प्रकाशनार्थत्वं स्तुत्या सिद्धत्वात् अग्नेयीषु स्तुवत इति पुनर्वचनमनर्थकं स्यात् अदृष्टार्थत्वे तु अनाग्नेयीनामपि प्रकृतित्वात् प्राप्तानां नियमः
स्यार्थवत्त्वं अवश्यकं इतोऽपि ते प्रधानकर्मणी इत्याह। अन्यश्चार्थः प्रतीयते स्तुतयज्ञशंसति वैश्वदेवं स्तोत्रं शस्त्रं इति स्तुतशस्त्रयोः पौर्वापर्यसंबंध
वचनात् अपि दृष्टदृष्टार्थः प्रतीयते प्रकाशनरूपदृष्टार्थत्वेन स्यैकत्वेन एकार्थत्वात् ह्यि कल्पनायां पौर्वापर्यसंबंधानुपपत्तेः इतोऽपि ते प्रधानकर्मणी।

इत्यादि। अभिधानं च कर्मवत्। अग्निहोत्रं जुहोतीत्यभिधीयजनितनन्तपात्रं पजनीसादि प्रधानकर्मणि वृद्धितीपापाद् इत्यिनन्तमताभिधानं इत्यप
ते पशोरनुपपद्यते प्रउगं शंसतीति निष्केवल्यं शंसतीत्यादि तदेतद् दृष्टार्थत एवोपपद्यते अदृष्टार्थत्वे हि सति क्रतुफलं प्रसज्येत मात्र द्वारा
कर्मफलं प्रति प्रसासन्नसाधनताहि सिद्धिनन्तमतत्वं दृष्टार्थत्वे तु द्रव्यदेवतादिप्रकाशकत्वात् फलं प्रति व्यवहितसाधनत्वान्नेत्थं सिद्धनन्तमत्वे
अङ्गोपि प्रधानकर्मत्वेन वदितोपि स्तुतशस्त्रे प्रधानकर्मणी इत्याह। फलनिर्वृत्तिश्च स्तुतशस्त्रयोर्न स्यात्। तयोः शास्त्रस्य शास्त्रमसीति मंत्रयो
रिं द्रियवंतावनामहे धुक्षीमहि प्रजामिषं सामे सत्याशीरेव शुभ पाद् फलवर्च सम्भाग स्यात्‌ इति स्तुतशास्त्रे प्रति फलनिर्व्यक्तिः प्रा
र्थ्यते। न हि इदं स्तुतशस्त्रयोः प्रधानकर्मत्वे घटते देवताप्रकाशनार्थत्वे तु देवताप्रसेव फलं प्रार्थ्यते तस्मात् स्थिते कश्चित् हासीनः प्रा
र्थ्यते फलमिति न्यायात्। तस्मात्प्रधानकर्मणी स्तुतशस्त्रे अदृष्टार्थे प्रयोजनं पूर्वपक्षे उत्कर्षः सिद्धान्ते तु तदुत्कर्ष इति स्पष्टं प्रवृ प्र
योजनान्तरमपि दशमस्य चतुर्थे गृहमेधीयं देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यादिति तत्र चतुर्थं प्रति इति स्तुतशास्त्राविकरणं। ता
नि द्वैधं गुणप्रधानभूतानीत्यादि। तान्यादौ द्वैविध्यमुक्तं तत्प्रसंगात्त्रैविध्यं प्रकारान्तरेणानुवादकं तदुपक्षेपाचि व्याख्यातानां ति
रूपयितुमिदमारभ्यते। संति कानिचिद् व्याख्यातानि मन्त्रब्राह्मणगतानि यच्छंदमध्ययोजमपुरुषपदित्यादि युक्तानि। देवांश्च या
भियंजते ददाति च ज्योगिताभिस्सच ते गोपतिस्सह इति काम्यपशुयाज्याकाण्डे गोदेवत्यपशुपर्यंतपापठिते मंत्रपाभिगोभिः देवान्यज
ति या च दक्षिणाः ददाति ताभिः गोभिः गोपतिः यजमानः ज्योग् इति चिरं सह यस्य समवैसेवेसर्थः। अग्निर्दग्धीनि हरेति मन्त्रो ज्योतिष्टोमे प्रैषः बर्हिर्
वसहेनं हामीति [illegible] मासयोब हि धवन मंत्रः तत्र वा [illegible] निर्वपामीति निर्वपामन्त्रः संति च पशो भयहविशब्द्यार्थे सैद्रपवे

इत्येवमपोह्य निर्वपेत् पृथगप्यन्येनाग्निष्टोमेनार्तं प्राप्नोति। याहि देवानां सूक्तपाठं निर्वपेदित्यादिषु कायगतान्याख्यातानि आख्यातानां नैरेकवाक्य
तामुपगतानि तानि तानि सर्वाणि विधायकान्यनुवादकानि वेति संशये पूर्वपक्षयति विधिमन्त्रयोरैकार्थ्यमेकशब्द्यात्। मन्त्रग्रहणमुप
लक्षणं यजेत स्वर्गकाम इत्यादि विधौ देवांश्च याभिर्यजते इत्यादि मन्त्रे च यत्सोमेन यजेतेत्यादि ब्राह्मणवाक्ये च। तानामाख्यातानां एकार्थ्यं विधानार्थत्व
मेव। ननु केषांचिद्विधायकत्वं केषांचिदनुवादकत्वमिति कुतः। एकशाखायां सोमेन यजेत इत्यादौ देवांश्च याभिर्यजत इत्यादौ चैकवाक्यात्तत्र
दः प्रसमभिव्याहृतेः। तत्र कश्चिद्विधायकः कश्चिदनुवादक इति विशेषाश्रयस्य प्रमाणं न किंचि[illegible]स्याम। न च प्रकृतप्रयोगाभेदप्रसमभिव्याहृता
कं येषां नान्तरं विधिर्दिवा व्यवस्थापि प्रकृतकर्मविधिशब्दात्तत्र साधीयः कर्मान्तरत्वावगमसम्भवात्। तस्माद्विधायकान्येवंजातीयकान्या
ख्यातानि सिद्धान्तयति। अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात्। अपि वा पूर्वपक्षव्यावृत्तौ। मन्त्रः मन्त्रादिगतमाख्यातमेव ...। न
विधायकः किंतु अभिधानवाची कर्मणि लुप्तविधायकव्याख्यातशब्दाभिहितस्यार्थस्य वाचकः अनुवादकः स्यात्। कुतः। प्रयोगसामर्थ्यात्। प्रयोगम
धेयप्रयोक्तृपुरुषस्मारकत्वात् स्वार्थस्य यथार्थवाचकत्वे याभिर्देवांश्च याभिरित्यादि सोमेन यजेतेत्यादि ब्राह्मणवाक्यस्य तत्सामर्थ्यान्न विधौ
वा सामर्थ्यात्। याहि देवांश्च याभिर्यजत इति मन्त्रे मन्त्रेणावगतस्य गोयागस्य प्रयोगसमये नस्मृतिसिद्धत्वावगमेन न विधेयत्वात् तत्प्रसाधने विधिशक्तिः पू
र्वविधस्य स्मरणम्। एवं यत्सोमेन यजेतेत्यादि ब्राह्मणवाक्येषु विधिश्रवणमपर्यवसन्नं तावन्नात्र विधिशक्तिः प्रतिबध्यते। नहि देवांश्च याभिर्यज
त इति पर्यवसन्नं वाक्यं ज्योतिष्टोमेनाभिहितं वदतः सन्नेतानाकासन्नतांश्च एवंजातीयका मन्त्राः प्रयोगमध्य एव प्रयोक्तृपुरुषस्मारकत्वे
यार्थस्मरणाय प्रभवेयुः। ननु विधानाय। अन्नीदग्नीन्विहर बर्हिः स्तृणाहि इत्यादिमन्त्रास्तु प्रयोगमध्ये प्रयोक्तृपुरुषेणोपपुरुषं प्रति प्रेषार्थत्वाद

तत्रापि समर्थाः नतु विधाने । अग्नेयं त्वविभक्तेरभिमुखो यं प्रतायुक्तत्वेन सर्वपुरुषसाधारणो विधिप्रसय एवैतैर्याधिसात् अनेनैव न्यायेनोत्तम
पुरुषस्यत्वेऽपि विधिशक्तिप्रतिबंधो द्रष्टव्यः आत्मनियेरणसंभवाच्च यदि न बाधं प्राप्तश्रीयादिसादिशास्त्रीलणबाध्यानामपि पदे शब्देन
विधिशक्तिप्रतिबंधात् वैश्वानरेष्ट्यादिप्रयोगे निषिद्धेऽपि पदद्वये नैसामर्थ्यं नतु विधाने यत्र च विधिशक्तिप्रतिबंधकं पुरुषस्वातंत्र्यं नास्ति तत्रै
वास्यात् तस्य शब्दान्तरेणाभ्यासादिभिर्भेदकत्वात् पुरुषान्तराणां विधिशक्तिप्रतिबंधकत्वं वक्तव्यं नान्तरप्राप्तार्थत्वेन तु तस्ये पां विधिप्रतिबंध
कता । अन्यत्र यागपदद्वये याद्विवारोपमुक्तागतिः । कर्त्तव्यतायस्सु यथा यास्मिन् विधानता च क्वाभिमुख्यात् संभवाद्विधेः । आत्मनिप्रेरणाभावा
न्निमित्तताभिधानतः । विधिशक्तेर्विहन्यमानायाः पुरुषादिवचनप्रसंगः । प्राप्तयोर्मेनुतद्धाधान्यक्यपि न स्यादविहन्यतेऽनिनद्धाधानतस्य
पुरुषादिवत्तु पयस्य सामर्थ्यसामान्यादि सर्वाः स्वातंत्र्यात्तावत्तदिति विधिसंज्ञाधिकरणं । विधिमंत्रयोरैकार्थ्याधिकरणेऽपस्तरणा
तयागृहीतमंत्रप्रसंगात्तद्ग्रहणमपि युक्तं तत्र चोदकेषु मंत्राख्या ॥ अभिधानवाचीत्यादि नित्यं एवं स्वजोपानमभिधानं तच्छ
ब्दःप्रमाणमित्याह तस्य अभिधानस्य अनुष्ठेयार्थप्रकाशनस्य चोदकेषु प्रयोजकेषु वाक्येषु मंत्रशब्दो वर्त्तते तथा च अग्निष्टे पा
र्वे स्मारकत्वात् तमंत्रसंज्ञस्य सामिधेनिपर्वतस्य इह बलस्यैणपरस्वार्थजपादिमंत्रेषु व्याप्तवसंज्ञायकपिंजलानालभेत
इत्यादि नाम प्रामाण्यं कृत्यविधायकत्वेनादृष्टार्थस्मारकत्वाभावान्नेषु चाव्याप्तं अतः प्रायिकमिदं लक्षणमिति प्राचः वस्तुत
स्तु विधिमंत्रयोर्नित्यत्रोपात्तं विधिनच्छब्दःप्रमाणमशक्तिसः यजेत स्वर्गकाम इत्यादिप्रधानविधिः चोदकः येषां तानि तच्चोद
कानि वाक्यानि प्रयोगविधिपरिगृहीतानि तेषु मन्त्रशब्दो वर्त्तत इति व्याख्येयं प्रधानविधिरेव सांगप्रयोगस्य विधायक इत्ये

कादशाध्यद्वितीयेऽङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरन्निति सत्र च स्थानेन यावत्कर्माङ्गवाक्यात् मंत्रत्वस्मरणाभिनिपर्यवस्यत्तीन च कृ
त्स्नस्य वेदस्याध्ययनरूपकर्मार्थत्वान्मंत्रत्वापत्तिरिति वाच्यं अध्ययनविधिविहितस्वाध्यायस्य ग्रहणार्थः अदृष्टार्थत्वाच्च नचाघेऽस्वाध्या
यस्याध्ययनप्राप्तत्वेन तदङ्गताभावाच्चाव्याप्तिः द्वितीयत्वे तु तत्त्वपराध्ययपठनरूपाध्ययनकर्मार्थत्वेपि न च विनियोगस्वाध्यायविधि
हिताध्ययनतो गृहीतस्य स्वाध्यायस्य पठनेनार्थवादिकं पयःकुल्यादिकं फलं भावयेदिति सर्वः तत्र स्वाध्यायस्य पठनरूपाध्य
यनकर्मार्थत्वेपि न तदायकृत्स्नवेदस्य मंत्रत्वापत्तिः उच्चारणलक्षणात्कर्माङ्गत्वं तस्य विवक्षितत्वात् नैव मपि ईशावास्यमित्यादेस
वेभिस्तरोपनिषद्मंत्राणां कर्माङ्गताभावादव्याप्तिरिति वाच्यं एवं जातीयकानां मंत्रत्वेऽपि विनियोगानामपि चावत्तोमाहे विनियोगसत्
नेकर्माङ्गत्वस्य सत्त्वात् वान्तस्तोयाङ्गशब्दत्वं वा मंत्रत्वं तत्र सर्वा नरः चः सर्वा ऋतीयजं विसर्वालितामा निवाचस्तोमे परिप्लवं ईशावास्या
दिविधानात् एतेन कर्माङ्गशब्दत्वस्य मंत्रलक्षणत्वे उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ इति नाचिकेतादिब्राह्मणस्यापि मंत्रत्वाप
त्तिः नाचिकेतमुपाख्यानं मित्युपक्रम्य प्रयतश्राद्धकाले वा तद्दाने स्यायकस्मात् इति श्राद्धे तदभिश्रावणादि विधानादिति निरस्तं तस्यवाच
स्तोमकर्माङ्गताभावात् ऋग्यजुस्सामान्येवैव सर्वेषां तत्र विनियुक्तत्वात् न चैवमपि दर्शपूर्णमासादिप्रयोगदशायां वाचस्तोमाङ्गताभा
वान्मंत्रत्वं न स्यादिति वाच्यं वाचस्तोमाङ्गशब्दत्वावच्छेदकधर्मवत्त्वस्य विवक्षितत्वात् तदवच्छेदकधर्मवत्त्वस्य ऋक्त्वं यजुष्ट्वं सामत्वं च
ऋगादीनां वाचस्तोपे ऋग्जा द्विषमीयुरस्कारे स्तोमविधानात् ते षां च वाचस्तोमाङ्गशब्दत्वावगमः एतेन ऋग्यजुस्सामान्यतमत्वं मं
त्रत्वमिति निरस्तं अन्यतमस्यामान्यतररूपत्वेन गुरुत्वात् परमार्थस्तु ऋग्यजुःसामान्यतमत्वमेव मंत्रत्वं न चोदके क्षितिसन्तुवाचस्तोम

१९

कर्माङ्गतत्स्वरूपानुगमकधर्मप्रतिपादनमुखेनतत्संशयापनोदः सामान्यतमतत्स्वरूपस्यैवमन्त्रलक्षणतयावेदनोवगमात् अस्ति हि स्वयोगो बा
त्रहे बुध्नीय मन्त्रम्मे गोपाय यमृषयस्त्रैविदा विदुः ऋचस्सामानि यजूंषि सा हि श्रीरमृता सतामिति येषामग्न्याधाने आवश्या
ग्नेरूपस्थाने विनियुक्ता हत्वा हिंसकवुध्नि पुषु अंहदयन्तत्र भवसतां हृता अपुवसख्याग्नौ। मममम। मन्त्रगोपायोरसा। यां मं
त्रं। ऋषयः मन्त्रदृशः त्रैविदाः त्रीन्वेदान्विदन्तीति त्रैविदः। त एव त्रैविदाः। स्वार्थे ण्किकृ सामयजुरात्मको पाविः। तानेवं तं गो
पायेत्यन्वयः। सा हि त्रयी सतां अमृता फलतः। अनन्तफलप्रदा। श्रयणीयेति वेदभाष्यं तथा च ऋक्सामयजुरात्मकं मन्त्रत्वमिति
स्थितं। मन्त्रलक्षणाप्रयोजनं मन्त्रेषु कर्मणी केवयोर्यान्यपदपदार्थिसाधेलघुपायेन लक्षणावगम एव। इति मन्त्रलक्षणं। मन्त्रब्राह्मणा
त्मकवेदे मन्त्रभागस्य लक्षणमुक्त्वा तत्प्रसङ्गाद्ब्राह्मणभागस्य लक्षणमाह। शेषे ब्राह्मणशब्दः। मन्त्रभागावशिष्टवेदभागे
ब्राह्मणशब्दो वाचकतया वर्तत इत्यर्थः। विधिपरो वेदभागो ब्राह्मणम्। अर्थवादानामपि विध्येकवाक्यत्वेन तत्रैवान्तर्भावः। ब्राह्म
णावशिष्टवेदभागो मन्त्र इति पारिशेषिकः। यद्यप्युपलक्षणवाचार्यः। यत्र ब्राह्मणयोर्वेदनामधेयं कर्मचोदना ब्राह्मणानि ब्राह्मणशे
षोऽर्थवादो निन्दा प्रशंसा परकृतिः पुराकल्पः मन्त्रादिति लक्षणप्रयोजनं तु एतद्ब्राह्मणमेव पंचहवींषि एतद्देवसावित्रेत्रा
ह्मणामथ्यानाविकृते हृस्वाहोलघुपायेन लक्षणावगमः इति ब्राह्मणलक्षणं॥ कर्माङ्गशब्देनानुगतीकृतं मन्त्रस्वरूपं सामान्यतम
लं मन्त्रलक्षणं। प्रकृते तत्राक्षिप्य समाधातुमिदमारभ्यते। अस्ति दर्शपूर्णमासयोर्होतुर्[illegible]दः अग्ने महाँ असि ब्राह्मण भारतेत्यसा
वसाविति तत्र असावसाविति स्थाने भार्गवच्यावनाप्नवानौर्वजामदग्न्येति प्रक्षिप्यते सोयं प्रवरः सूयते अनेन हि यजमानगोत्रजते

गर

एमः

१९

कार्त्स्न्ये देवताबाहुल्ये प्रदीयते तेन यथा नैवाग्नये जुष्टं निर्वपामीति मंत्रे अग्नय इत्यस्य स्थाने सौर्यायेत्युह्यते तेन यागे नैव अग्नीषोमाभ्यामिति हो
त्रवरणे मंत्रे असाविति स्थाने होतुर्नाम प्रक्षिप्यते तेन देवेषां प्रवरे ऊहेन नामधेयानां वेदे प्रसक्तमनाम्नातानामपि मंत्रम पठितं तेन मं
त्रेण ऊहकार्यप्रतिपादकतया मंत्रकार्यापादनीय देवताप्रकाशनकरत्वाद् मंत्रत्वं तमवश्यं मामाम्नेयमिसा शंक्य निराकरोति। अनाम्ना
तेष्वमंत्रत्वमाम्नातेष्वपि विभागस्यात्। वेदे प्रसक्तमनाम्नातेषु प्रवरेष्विषु अमंत्रत्वं स्यात्कुतः क्लिप्साकारेणात्र वेदे प्रसक्तमाम्नातेषु

२

वनाकोषु मंत्रब्राह्मणविभागः क्रियते प्रवरादयस्तु असाविति परोक्षे त्वेति दिष्टाः नतु प्रसक्षेणोक्ता। न मंत्रत्वं तेषां मंत्रैकवाक्यत्वं तु
न मंत्रप्रयोजकं इषे त्वेत्यादावध्याहृतयमानोच्छिन्नत्रीसादृश्यमभिधाय एतन्नापि मंत्रकार्यकरत्वं तत्र प्रयोजकं अप्यूह इष्टे ह एव घोषादयो अभिचारात्
अस्तजं सर्जनसादिमंत्रकार्यकर्तृत्वोपकरणे ऽथ घोषादेस्तत्र विधानात् तयोरपि अग्नीषोमाभ्यां घः आशास्ते ऽयं यजमानो ऽसावित्यसाविति देशाद्यनिर्दे
हास्पतन्नामाम्नानपूर्ववृत्तित्वेन तयामंत्रे समेवं जातीयकानामिति सुब्रह्मण्यानिगदादौ व्यवदृश्यते वरहितेऽपजमानस्य तत्सर्वं पापपृ
रेषां च नाम गृह्णातीति विधीयते एवमसन्निक्षिप्यमानं नामधेयमप्रयोगाद्याहरणानामिति प्राचः। तदयुक्तं प्रत्यक्षाम्नानस्यैव मंत्रत्वप्रयोजकत्वे
नेऽसाविति परोक्षनिर्दिष्टानामाम्नानामपि मंत्रत्वाभावस्यैव युक्तत्वात् अन्यथा प्रवरस्यापि अमंत्रत्वादिसंदेशाद्यनिर्दिष्टत्वेन मंत्रत्वापत्तेः। य
जमानस्य तत्र देवानामपरेषां च नाम गृह्णातीति विधीनामपदेन यजमानानाम्नामुपनिर्दिष्टतया पत्नीत्वापत्तेश्चेति द्विप्रयोजनं प्रवरेह
नामधेयेषु यत्कर्म एप जपन् श्वसामश्चितिमन्त्रेषु विहितयेकस्सं मंत्रत्रेषप्राप्तिं तं च न भवतीति मंत्रलक्षणशेषः स चोयजं विः
सामालिङ्ग्याह स्फन्तत्र मन्त्रब्राह्मणमाह। तेषामप्युपनार्थवशेन पारस्पवस्था। तेषामप्यचागामध्ययनत्रयस्मिन्न ग्निमीलेपुरोहितमित्यादि

१७

पंक्ते पादव्यवस्था अक्षरसंख्याविशेषः पादः अष्टाक्षरा गायत्री दशाक्षरा विराट् एकादशाक्षरा त्रिष्टुप् द्वादशाक्षरा जागती स्यादित्यमाणा
नम्यः तत्र चतुष्काक्षिपदा गायत्री चतुष्पदा त्रिष्टुप् इत्यादि छंदो व्यवस्था तन्नियमेन। सा अक्षरक्लृप्तेन ऋचा। न तु अग्निमीळे पुरोहितं य
ज्ञस्य देवमृत्विजं होतारं रत्नधातमम् अग्निः पूर्वेभिर्ऋषिभिरिति सप्ताक्षरचतुष्पदा त्रिष्टुप् छंदस्का ऋक् कुतो न स्यादित्याशं
क्याह अर्थवशेनेति अर्थैकत्वप्रयुक्ता पादव्यवस्था विवक्षिता तेनार्थवत्तिविभक्तिषु कार्यप्रति पादकत्वेऽपि पादबद्धमंत्रत्वमृग्लक्षणमिति
सिद्धं तं सामानि लक्षयति। गीतिषु समाख्या। रथंतरबृहद्वैरूपादिसंज्ञकगीतिषु सामशब्दो वाचकः न तु यावत्तन्नियमविशिष्टाय शब्दस्य गीति
वाचकत्वं सप्तमे स्थकपः प्रपंचयिष्यति तथापि अग्न आदिके दकथनप्रसंगादिहाप्युक्तं यजूंषि लक्षयति शेषे यजुःशब्दः अवसामाव
शिष्टमंत्रभागे वाचकतया यजुःशब्दो वर्तते न चैवं सति युंजते मन उत युंजते धियः इममगन्म व्याल्लिमा हावत्वियजुर्देवबद्धत यजुष्ट्वं से
यत स्य समष्ट्याद्यसादिग्राह्यतो युक्तं पंयजुश्शब्दव्यवहारदर्शिना पं यजुर्वेदपाठितत्वेन लक्षणापातादुपपन्नेः अगादिलक्षणप्रयो
जनं नु प्रस्त्याव्याप्यमतीति कामप्यस्य वं यजुस्सामवानत्रलयस्तत्तिप्तताद्यथा शेषघपापेनेतस्यावगमः अथ शेषयजुश्शब्दस्याती
व्यसमाधातुमिदपादम्यते संति निगदनापपरसंघोयनार्थामंत्राः अग्नीदग्नीन्विहर बर्हिः स्तृणाहि प्रोक्षणीरासादयेत्यादयः ते किं यजुर्भ्यो
भिद्यन्ते उत यजूंष्येवेति संशये पर्वपक्षस्य यन्ति। निगदेष्वाचतुर्थस्यादर्मविशेषात्। वाशृडेन अर्थेन निगदेन यजुः सुतः धर्मविशेषात्तु
धेरस्त्वाकिं यत्तेडश्चे सामाध्माडपाश्रु यजुः पाडश्चे निगदेनेति निगदस्य यजुर्वि[illegible]स्तो चेत्स्वधर्मविशेषश्रवणात। निगदस्य यजुष्ट्वे
उपांशुत्वस्येचोविसात स्तसामयो कास्लेन डश्चेस्वामिव यजुः अपि हिकातल्लेनोपांशुत्वयव गतं तस्यान्निगदाख्यपंचजातं चतुर्थस्या

एम:
१७

नरसो पि निगदेन यजुरित्याह। व्यपदेशाद्यूहमानियजं ऋषिरनेन निगद इति संज्ञाभेदेऽपि निगदो यजुरेव सर्वः सिद्धान्तयत्नि यजं विधानात् रूपत्वात्
वा शाब्दस्य एवार्थे यज्ञं ध्रुवं निगदाः कृत-नद्रूपत्वात् मन्त्रसामर्थ्यं न रूपम् मालब्रतानात् यद्यूहे निगदानां यजुष्ट्वे उपांशुत्वमेवाचितं नत्व
चैस्त्वमिति तत्राह वचनाद्धर्मविशेषः। उच्यते नैतेन तिवचनं सामर्थ्यं निगदानां संबोधनविभक्तिघटितानां परसंबोधनपरत्वेन परस्प्रसायत
रूपकार्यवशादुच्चैस्त्वरूपधर्मविशेषः एवं च कुमुचित-नतः पांशुत्वं यत्र संबोधनविभक्तिर्नास्ति प्रोक्षणीरासादयेत्यादौ तत्र कथं पर
संबोधनार्थता न च मध्यमपुरुषलोडादेशानन्तरसंभवद्धृति वाच्यं प्राप्तकालता पाणिनीयलोटो विधानात तदर्थकलोडादेशमध्यमपुरुषस्या
विवक्षितार्थतायां हि जीये प्रेषपुच्छपरिधि काराद्दिसनवस्थमाणत्वाच्चेतत्राह। अर्थाच्चाश्रावीधार्द्धि परस्य प्रोक्षणीरासादयेत्यादिषु सर्वं
मविवक्षितमिति प्रेषार्थत्वे प्रपेक्षितद्वारार्थत्वं च न प्राप्तकालार्थत्वे तु अनपेक्षितमर्थार्थत्वं मध्यमपुरुषस्याविवक्षितार्थत्वं च स्यात्
एवं च रूपप्रयोजनवशात्संभवदविवक्षितलोडर्थवशाल्लोटोनप्राप्तकालार्थत्वं किं तु प्रैषार्थत्वमेव वक्तव्यमिति सर्वेषां निगदानां परसं
बोधनार्थत्वात्सिद्धं च काल स्वरूपसमुच्चयार्थः तथा हि नन्तुऽपांशुयज्ञेषु ये तिवाचनिकमुपांशुत्वं संबोधनविभक्तिसामर्थ्यरूपलिंगलभ्येन
परसंबोधनरूपकार्येण कथं बाध्यतां लिंगेन प्रसक्तस्य वचनस्य बाधयोगादिति तत्राह चेति मन्त्रस्योपांशुत्वं मंगं अर्थप्रसायनं कार्यं तु
प्रधानत्वस्य लिंगरूपदुर्बलप्रमाणगम्यत्वेऽपि स्वरूपतो दुर्बलस्योपांशुत्वस्य नेनवाधो युक्तः प्र
माणवत्त्वात्प्रथमप्रवत्त्वसमायस्य त्वस्य निपात पितत्वात् लिंगबलिंगगम्यपरसंबोधनकार्यं लिंगगम्यमात्रविषयेऽपांशुत्ववचनं तु यजुष्ट्वे
रसावकाशं न नन्वान्यथानुपपत्तिहुतानामिति मायेन लिंगस्येव प्रबलतया तेनोपांशुत्वबाधो युज्यते। वस्तुतस्तु योपांशुत्वस्य बाधः उपां-

शुक्लत्व निगदेषु अप्राप्तेः । उपांशु यजुषेति निगदा सर्वे विधिः यं त्र विधिवलेनैवृतस्य कदाचित्प्राप्तत्वानन्तत अपनीयमेनोपांशुत्वं प्राप्यते तत्र
नियममात्रमुपांशु यजुषेत्यनेन क्रियते निगदेषु तु परसंबोधनार्थत्वेन कदाचिदुपांशुत्वसंभव इति न तत्रोपांशुविधेर्व्यापारः अतो न तत्रा
प्रसक्तिः एवं च साम च्चान्निगदानामुच्चैस्त्वमेव कुर्यादिति तान्नचैवं सविड्ढै निगदे नेति वचनानर्थक्यं शंक्यं क्वचित्काम्यार्थमुच्चैस्त्वेपि
यजुष्ट्वं तदेतदुपांशुत्वमेव युक्तमिति सोपि वित्सनोपांशु यजुषेति विहितत्वात् सर्वेन तत्त्वाद्गान्यप्ययुक्तं व्यपदेशाद्वेति तन्नाह गुणार्थव्यप
देशः ॥ ब्राह्मणपरिव्राजकन्यायेन नितरां गच्छत उच्चैस्त्वार्थतः तेषु सतिसिद्धस्य विशेषणनिबंधन एव यजुषामेव केवावि त्रि
गदव्यपदेशसामर्थ्यः अत्र शंकां निराकरोति । सर्वेषामिति चेन्न व्यपदेशात् । पादेन निगदानामुच्चैस्त्वनिबंधनं निगदत्वं तद्धि ऋच सामानामपि सर्वेषां
न स्यादिति चेत् तन्न कुतः ऋग्व्यपदेशात् अयाज्या वै निगदा इति निगदान्निर्दिश्य ऋचो याज्या भवंतीति पर्युदस्य निर्देशान्न हि तद्व्यलिंगं घतो ।
विधीयते चेति युक्तं न स्माद्यजं ऋत्विग्निगदः प्रयोजनं एवं च सेवा च स्तोमे सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानीति पाठः ऋतु शंसनो ।
तिगदानाम प्राप्तिः सिद्धं तेनुत स्याद्धि इति केचित् यजुर्वेदप्रायपाठ्यान्नवरत्यं तित दयुक्तं यत्को यतस्याति भवति निभृदिति चतुर्गृहीत पाठ्यग
होता गाह पत्ये जुहुध्वं पदेयजुषा भुव इति दक्षिणायाग्नावग्नीधे सामेति इति यजुर्वेदप्रायपठितं च नेदं निगदानां यजुष्ट्वाभावे पि यजुर्वेद इवि
हितकर्माभिलमात्रेणातत्त्वेषत्व भवतीति तत्र ऋग्वेदादिपठितानां देवपरत्वानन्तरं यो वेदाग्रजो यं तं मृ रित्संगवेदान भुवरित्ति यजुर्वेदान्तविहितै ।
सामवेदादिलुपक्रमे ऋग्वेदेन ऋग्वेदभिधरुचोति यजुर्वेदं सामवेदेन सामवेदमित्युपसंहारे च वाजसनेयके तथा ऐतरेयकाणां के
वकारे यत्राल्लोपक्रमे वेदानामेव अवणानन्त स्मादृश्यम् इत्युक्तमेव प्रयोजनं साध इति निगदाधिकरणं ऋक्सामयजुरात्मकम्

त्रस्वरत्वेति हृपितेप्रसंगात्तद्वान्तराभेदे कथमीयेमन्वोसाम्यांवाध्येत्रपदं पदएसिद्धान्तुद्धिः घपाठादेवनत्स्ति हे प्रश्लिष्टपठितेषुयजुष्युनियदेकं
यजुरितिजिज्ञासितंतत्रोच्यते प्रश्लोत्तितं अर्थैकत्वादेकंवाक्यं साकांक्ष्यं चेद्विभागे स्यात्‌ तत्र अर्थस्य कालकारणलक्षणप्रयोजनस्यैकत्वाद्धेतोः ए
कवाक्यप्रसंगात्‌ यथाश्रव्यशब्देन यागप्रयोगे उच्चारणीयं यजुः से स्यन्ते नहि यजुर्भेदविचारे लौकिकवाक्यसाधारणापेकवाक्यलक्षणंसंग
तं भवति । ततश्च यावतसमहः प्रयुक्तो यागसाधनतामश्नुते तावदेकं यजुरित्युक्तं भवति इसतेनेनैत्ति यजुरित्युसनेरितिभावः । नेताव
देवयजुरेकस्य प्रयोजकं । तथा सति भगोवां विभजतु अर्थमावा विभजतु एषा वां विनक्तितिभिन्नेषु वाक्येषु रागशीपथि विभाग
रूपैकार्थनपाएकयजुष्वापत्तेः । किंतु तथाविधं पदजातं यद्येकस्यापि पदस्य तो विभाजेसतिसाकांक्षंस्यात्‌ तदेवमेवदेकं यजुः
एवंच पावसद्जातं यजुर्लक्षणलक्षितं यागसाधनमपच विभागेसाकांक्षं नाव देकं यजुरित्युक्तं भवति न चैतावता प्रस्तुन यजुर्भेद
किमायातमिति वाच्यं यजुरेकत्वेकथिते ननतो म घजुरंतरमित्युक्तप्रायत्वात्‌ । एवं च अर्थैकशब्देनाभिधेयवाचीति तथासति विभागेसाकांक्षमि
त्यस्यैवेप्यव्याप्ता भगोवांविभजतिसादीनांविशिष्टकार्यप्रतिपादकत्वभावेनातिव्याप्तिरित्यादिसाद्वार्त्तिके प्रपंचितं । विभागेसाकांक्ष
मित्यस्यैवेप्यव्याप्ता भागोवां विभजतिसादीनां विशिष्टैकार्थप्रतिपादकत्वभावेनातिव्याप्तिरित्यादिसाद्वार्त्तिके प्रपंचितं । विभागेसा
कांक्षं कं यजुरित्युक्ते मन्त्रो यावता तथा माग्निर्गर्धर्वस्त्वमोषधयो स्वरस उर्जानामसर इन्द्र स्नसस्नं पातुनार इन्द्र स्नसस्नं पातुनस्ते स्वाहेत्ताभ्यां
स्वाहेत्यादि मन्त्रे मंत्रे युद्दे स्वाहाकार एवैकं यजुस्यात्‌ विभागे साकांक्षत्वात्‌ न चैवं शायतिः वाजसनेयकेऽग्नौ तोजुहोतीति प्रस्तुस
मिघुतानिजुहोतिपुंसेपर्वसमिजुहोसस्त्रशोभमः दृश्यावाहुनयाभवंतीति विभक्ते ... मानात्रेतएवसंकर्षकांडद्वितीय

१९

19

यस्य वनुर्येऽप्तजोवाद्दून यामेत्तिय यार्थविनिष्कर्षो र्थय यत्कादिसंधिकरलोऽप्त नाबाहून धामाग्निं जं पर्वसहदं ब्रह्म स्त्रं पांतु तस्मै स्वाहा न
स्पोष धयोष्परसंदुर्जो नामता इदं ब्रह्म स्त्रं पांतु ताभ्य स्वाहे सेर्वं पुवाचकाल्ह्रीवाचकाक्ष्रुशब्दः प्रतिहोमे विनिष्कृपप्रयोक्तव्याः उभय
या पाठमिति विचारसंगच्छतेन चैकयजुषाभावे षड्जुहोतीति विरोधश्शंकः तस्य पर्यायाभिप्रायत्वात् तस्मै स्वाहा ताभ्य स्वाहेसन्तः प्रो
क्षु पठितान्मताषाडून बामा यं हितो विश्व या पासि पुष्मेसस्यरश्मिपतिसादयः पर्याया ते चभुवनस्य पतइत्यनः प्राकृष देवभवन्ती न
देतत्त्रैवाग्निमाधिकरणो षड्जुहोतीति पर्याय वाद्य पक्षा विनोतीति जुहोमि सम प्रयंचव्यिष्यते एतेन षड्जुहोमीति तेतिरी
यकमपि मा ख्यातः एवं च रातृभक्ष मंत्रे ष्वप्रतिस्वाहाकारयजुर्भेदानां विभागे साकांक्षतया एकयजुष्टु मभ्युदितसर्वैकलादिस्मुके
शस्त्रीयणाम्बा मेकादशार्थत्वात् तन्त्रादि वाग्निवारणाय यजुर्लक्षणलक्षितमिति । उदाहरणं तु देवस्य त्वा सवितुः प्रसवेऽश्विनो
र्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीत्यादि यजुः । नच देवस्येत्यस्य विभागेपि त्वा सवितुरित्यादेर्निराकांक्षतया कं पतेन
स हैकयजुष्ट्वमिति वाच्यं । नेच्छत्र विभज्यमानस्य विभागावधिभूतस्य तस्य स्वतंत्रयाकांक्षैव विवक्षिता । अन्यतरस्याया विश्रान्तत्वात् । तत
श्वे देवस्येतस्य तासवितुरित्यादि साकांक्षत्वान्नहोमः । क्वचिद्द्येह्यपरस्य स्वस्य साकांक्षया काश्चास्तस्य तेष्वन्यतर एकाशीयाश्चनेपाया
तः देवस्येत्यस्य विभागे साकांक्षतया अश्वानेयस्य प्यानत्वात् सवितुरित्यादेरपि तेन कांक्षार्थापन्ना उभयाकांक्षस्य एव वास्तवं त्रिनिर्वाहः । न चै
वं मपि नत्वा योऽइन धामाग्निं गंधर्व स्त स्पोष धयो प्सरसंदुर्जो नाम स इदं ब्रह्म क्षत्रं पांतु ताः इदं ब्रह्म क्षत्रं पांतु तस्मै स्वाहेति प्र
यमहोममंत्रेन स्पोषयोप्सरसंदुर्जो नाममता इदं ब्रह्म क्षत्रं पांतिल्य शास्त्रीयपरस्परनादितांशास्योपष्टम्भपरस्परवान्यतरा काः

एमः

१९

स्मापात्रप्रभावात्कथमेकं यजुस्त्वमिति वाच्यं ऽस्मात्पृजे । स्त्रीपरस्माशास्यता भस्त्वाहस्तुतरम् मंत्रैकवाक्यतापातेनैवैकयजुष्ट्वा
त् । परं तु यथा मानमेवानन्वितोपि स्त्रीपुरोशः पूर्वमंत्रे प्रयुज्यते अविरोधात् पूर्वमंत्रे प्रयुज्यमान एव प्रयुक्तस्त्रीपरस्माशस्मा
नरयाजुष्वाकांक्षावशेनान्वयसंभवात् । लोकेकोयेषुकांत प्रच्छामहे नन्वी पुलकोत्कपकादिरांडुतमाधत्स्वनेत्रांतगतः केति प्रिपस्त्वेसा हेपु
द्धिंगपहानात्स्त्रीलिंगपदस्य वहितानामप्यन्वयपदर्शनादिति संकर्षकांडे देवस्वामिभाष्ये स्पष्टः । अत्र भाष्ये वार्तिके च स्योनं ते सदनं करोमि पृ
तस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणाम मेध सुमनस्यमान इति द्वे स्त्रैकयजुस्त्वं स्यात् यजुर्भेदेन स्यात्तत्र
द्वे सर्थपृथक्त्वादिस्योनं ते पूर्वभागस्य सदनकरणप्रकाशनं उत्तरभागस्य पुरोडाशप्रतिष्ठितिप्रकाशनमिति प्रयोजनभेदाभाविति प्र
संगरस्त्युक्तं पार्थसारथिप्रभृतिभिश्चतद्भवोयोदितं तत्सर्वमापातेन । स्योनं ते सदनं करोमीति हि मंत्रेपात्रियपापदान्वेनसदनक
रणायुक्तराद्धेन प्रतिष्ठापनमिति एवं देभाष्ये भट्टभास्करमिश्रैः । यजुरेकत्वकथनप्रयोजनं तत्र पत्न्याख्यायमधीयीते कामष्टवाप
जुस्सामवातेद्बलपरस्संतिष्ठतरसाहोपावदेकं यजुस्तावत्प्रयोक्तव्यं न तु तदेकदेशः इति तद्देतात्रे यजुरित्येवं वक्तुं वाक्यशब्द
प्रयोगेणासूत्रितं । वाक्यमिति सस्यहि प्रयोगसमयेवचनार्हमिति सर्थः । इति यजुर्भेदनिरूपणम् । पलाशमजलोजोलेति किमेकं यजुः उतनेषु
लेसेकं यजुः उजैस्त्रेति यजुरेतत् मितिसंशयः । पूर्वतावदेकं प्रयोजनसमर्थं विभज्यमाने साकांक्षपदजातमेकं यजुरित्युक्तेभ
वतेवेन तथाविधपदचतुष्टयं नस्पत्तन्निर्वापादिक्रियासमवेतप्रकाशनरूपदृष्टप्रयोजनभेदोस्तीयनजुर्यद स्यात्तन्नल्लग्नक्किं पापद
मत्तितस्मादृष्टमेवात्रप्रयोजनं तेनैकत्वस्य मानलाघवादेकमेव कल्पनमिति भवति पदचतुष्टयमेकार्थ्यं । न चादृष्टचतुर्विधं पदे स्स

२०

20

मुद्दिश्यैव कल्प्यते विनियोगमन्तरा विरोधात्। अन्तस्तं हस्तकारिताद्विभज्यमाने साकांक्षत्वं भवति न चैवं सति शाखामाच्छिनत्तीषे त्वोर्जे त्वेत्यनुमार्ष्टीति विनियो
गबलाच्छिन्नमेवादर्शं कल्प्यत इति वाच्यं तत्र हि विनियोगभेदादर्थविधौ तेषु यद्विविनियोज्यमन्त्रभेदस्तत्र स्यात्। इह तु विनियोज्यस्यैकमन्त्रत्व
येवादर्शद्वयकल्पनायां सा निश्चिनत्ति तिप्रदर्शनं चतुष्टयमेवादिप्रतीकग्रहणेन पूर्वं [illegible] हृत्ने विधीयते। उत्तरएवाक्येप्यत प्रतीकग्रहणेना
नुमार्जने तत्र स्वपदचतुष्टयं विधीयते आ नः प्राणा एतु परावत आन्तरिक्षाद्दिवस्पृथिव्या आयुः पृथिव्या [illegible] अमृतमसि प्राणाय त्वेति मन्त्रस्याम्
मृतमसि प्राणाय त्वेति हिरण्यमभिव्यनीति। सेतिकग्रहणेनापि विनियोगदर्शनात् आवरसाभावमपि पदचतुष्टयस्य प्रयोगः। एवं च पद
चतुष्टयस्यैव छेदने विनियोगमादेशार्थत्वं [illegible] पूर्वोक्तलक्षणाच्छिन्नत्वात् सर्व चतुष्टयमेकं यजुरिति प्राप्ते सिद्धान्तयति। समेष्वेकवाक्य
भेदः स्यात्। इषे त्वोर्जे त्वेत्येवजातीयकेषु परस्परनिराकांक्षत्वेन तु समेषु वाक्यभेदः। यजुर्भेदः स्यात्। तथा हि एकार्थत्वं पदचतुष्टयस्या
सिद्धं विनियोगस्य रूपात्त्वाने विनियोगस्यैवासंभवेन प्रथमं विनियोज्यस्वरूपे पर्यालोच्यमाने ताशावद्ध्वलेन परस्परनिरपेक्षया भे
दनैव प्रतीयमानत्वेन विनियोगस्यापि भेदेनैव वाच्यत्वात् तदनुसारेण परस्परनिरपेक्षत्वेन वा द्वयस्य कल्प्यमानस्य भेदेनैव कल्प्यितुमुचि
तत्वात्। किं च आ नः प्राणा एतु परावत इत्यस्य मन्त्रस्य लिंगवशेनावगतमिति तत्र च प्रतीकग्रहणेन विनियोगः कथं विधीयते नहि मन्त्रैकस्य सा
धकं लिंगमस्ति किमुत [illegible] साधकं तावच्छब्दद्वयमस्ति तस्मादेकादशार्थमेव पदचतुष्टयं वस्तुतस्तु नैवं जातीयकानामदृष्टार्थता। अत्र प[illegible]
शनस्य दृष्टार्थत्वात्। इति शाखामाच्छिनत्तीति करणादिना मन्त्राणां छेदनादिक्रियाकरणत्वावगतेः नहि छेदनादिक्रियाकरणत्वमन्त्रा
णां तत्प्रकाशनमन्तरेण संभवति तथा च छेदनादिप्रकाशनं चोदनानुमानात् [illegible] समाच्छिनत्तीसादिप[illegible] विनियोजितम् [illegible] पिछेदनं पद

एमः

२०

चनुष्टयेन प्रकाश्यतां एवमनुमार्जनमपीति दृष्टार्थत्वेपि न मंत्रभेदस्यादिति वाच्यं प्रथमावस्थतदैरनपेक्ष्यात्तत्सारेण एव गेव छेदनादि
प्रकाशकत्वकल्पनस्य पूर्वमेवोपपादितत्वात् एवमायुर्यज्ञेन कल्पतां प्राणोयज्ञेन कल्पतामित्यादीनि दशवाक्यानि दशयजं द्विमवेति
वृद्धी यजमानं वाचयतीत्यत्र हि वृद्धिशब्देन मंत्रपरः किं त्वर्थपरः ततश्च वक्तुधात्वर्थान्वितं यजमानं प्रेरयतीत्यत्र चोयोर्थोपादानेति हि
तार्थयजमानकर्तृकवक्तृत्वविशिष्टवृद्धिवचनाविधिं कल्पयतीति कल्पितेन तदा धर्मविधिनिर्वाहाय चायुर्यज्ञेन कल्पतामित्यादेरायुरादिवि
शिष्टवृद्धिप्रकाशनपरत्वमेव वक्तव्यं ततश्च प्रकाश्यमानायुरादिविशिष्टवृद्धिविशेषरूपार्थभेदाद्यजुर्भेदः प्रयोजनं पूर्वपक्षे द्वयेता
जैत्वेति छेदनेपदद्वयं चतुष्टयं प्रयुज्यते एवमनुमार्जनेपि सिद्धांते तु द्वयेत्वेति छेदने वृजैत्वे स अनुमार्जने वृद्धिवाक्ये तु एकस्य मेषस्यैव कल्पनस्या
वृत्तिः पूर्वपक्षे त्वावृत्तिस्तु यत्र त्वग्र पत्सु सेवेति अत्र चेषेत्वेत्यादि साकांक्षमंत्रेषु योग्यपदाध्याहारेणाद्ध्वेलात्वं छिन्नद्मीत्यूर्जेत्वानुमार्ज्मीत्यादि प्र
योक्तव्यमितिकेचित्तन्न दृष्टार्थकं अध्याहारेणैव प्रयोक्तुः किंतु बोद्धुरेव मानसिकस्त्वएवेति लोकसिद्धात्तु ह प्रवर्त्तनामधेयानां तु अस्सोमान वह्नि
होतुर्नाम गृह्णातीत्यत्रार्षेयं वरणी तेनैव वृणीते तेन समाहरचनोहे हृदिसाकांक्षे हाव्यतत्वा लौकिकानामपि प्रयोगदर्शितः नाम तथा प्रमाणमस्तीति ता
स्मादाकांक्षित शब्दानां मनसैव स्मरणात् न तु प्रयोगः अर्थाध्याहारपक्षे तु शब्दस्यापि न स्मरणं अर्थमात्रमेव स्मर्तव्यमिति प्राचीनमता
नुसारि पंथाः येन प्रतिपादकेषु मंत्रेषु तत्तत्सानां देवतानाम चेतनप्रतिपादकेषु तदभिमानिदेवतानां शाब्दबोधः न तु प्रयोक्तुरिति मंत्रा
धिकरणे वोचाम ततश्च तत्तन्मंत्रलुप्तदेवताएव शब्दाध्याहारेणार्थाध्याहारेण वा वाक्यार्थमधिगच्छंतीति पार्त्तिकानुसारीयुक्तः
पंथाः इदंयजुर्भेदनिरूपणं ज्योतिष्टोमे उपसद्धो मम मात्र आम्नाताः या ते अग्ने पाशोपातन र्वशिष्टाः गह्वरेष्ठा उग्रं वचो अपावधीं त्वेषं

वचो ऽपावधीं स्वाहा या ते अग्ने ऽ जाशयाहरणायेति । तत्र द्वितीयतृतीयमंत्रयोस्साकांक्षयोरेकाक्षापूरणासमर्थो लौकिकश्शेषोध्याहर्तव्यः
पाते अग्ने रजाशया याग्ने जातास्मान पलिसेवं प्रकारेणोडपपूर्वमंत्रावयवस्य तनूर्वर्षिष्ठेत्यादेरनुषंगेणाकांक्षापूरणीयमिति संशयः
यद्यप्रकारांतरेणाकांक्षापूरणं तस्मान तागसभावादेकवाक्यनिवद्धस्यापि वैदिकस्य वाक्यशेषस्यानुषंगस्याश्रीयेत संभवति च लौकिके
नापि तत्पूरणं स्मृतः पूर्वमंत्रे निवद्धस्य तनूर्वर्षिष्ठेत्यादेरन्यत्र नयनरूपात्तु प्रयोगेन युक्तं अन्यत्र नयने च समाम्नायविभाषाल्लौकिक एव
वसात् तस्माल्लौकिक एव शेषोध्याहर्तव्य इति प्राप्ते सिद्धांतयति ॥ अत एव गोवाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात् अनुषंगः सर्वेषु
तत्स्य तद्वदनुषंगः तनूर्वर्षिष्ठेत्यादिवाक्यशेषः उत्तरयोरपि वाक्ययोरसमापकः समाप्तिरितिवाहुलकः समाप्तिरितिवाहुलकः कर
णोक्तिनं कुतोनुषंगः सर्वेषु तुल्ययोगित्वात् प्रथमद्वितीयतृतीयमंत्रेषु शेषस्य तनूर्वर्षिष्ठेत्यादेः सन्निधानरूपसंवंधस्य तुल्यत्वादिस
र्थः यद्यपि प्रथममपेक्षाशेषस्यानंतरान्यत्र नयनाद्वैदिकत्वं स्यात् नैतदस्ति तथाप्यपि सन्निधावाम्नातत्वात् एतावदेव हि शब्दानाम
न्वयेकारणं साकांक्षाणां सन्निधियोग्यत्वं च सन्निधिश्च वुद्धिपत्तिर्न जैमात्रं न तत्र नोपपत्तिः शाब्दनंतरं च समाम्नायस्साधकः नापि पुरस्ता
द्व्यवहितत्वं स्यामाम्नायो वाधकः किंतु अनन्वितपदांतरव्यवधानं वाधकं तदभावस्साधकः अत्र च तनूर्वर्षिष्ठेत्यादिशेषस्य प्रथम
द्वितीयाभ्यां कथं विदपि व्यवधानं तृतीयस्यापि वाक्यशेषेण संवंधे द्वितीयं व्यवधायकं द्वितीयस्य अनुषज्यमानशेषसाकांक्षत
याऽन्वितत्वेन अनन्वितपदत्वाभावात् अनन्वितपदांतरमेव हि वुद्धिविपत्तिजनेर्वाधकं साकांक्षितान्वितपदमपि प्रथमेन संवं
धे द्वितीयस्याकांक्षावैकल्यात् वुद्धिविपत्तिं वर्तमानत्वेनापि संवध्यते तत्संवंधात् वुद्धिविपत्तिरसमंगात्तृतीयेनापि संवंधुं शक्नोति तथा

चतुर्बुद्धिविपरिवृत्तिनिरूपसन्निधानं त्वयाणायुक्तिविशेष इति सकलशास्त्रानन्तस्यापि शेषस्य सर्वार्थत्वाद्बुद्धिकेनैव शेषेण पूरणसंभवे लौकिकशेषाध्याहा
रेण युक्तः । ननु यत्र साकांक्षा त्वा सन्निधौ शेषः पठ्यते अच्छिद्रेण पवित्रेणेत्यत्र सोऽस्य परस्परं छिन्नमिति तत्र कथमनुषंगः स्यात् आकांक्षाविरहात्
न वाच्छिद्रेण पवित्रेणेति शेषस्याकांक्षावशात्पुनरनंतरानां त्रयाणामप्याकांक्षामिष्टमिति वाच्यं सन्निहितेन शेषस्तासवि आपुनाति संति
मनैवा वयमासाधशांताकांक्षस्य शेषस्य पूर्वयोर्ण्याकांक्षोत्थापनाशंकेति चेत्सत्यं पुनरनंतराशेषोऽच्छिद्रेणेति राकांक्षाः । तथाप्यच्छिद्रेण
ति शेषस्य तृतीयाश्रुतिविभक्तेः स्यकरणप्रकाशकस्य नस्तोरकान्वये यपवनक्रियाप्रकाशनद्वारा प्रकरणेनिवेशो वक्तव्यः । सा च पवनक्रि
यास्त्रिष्वपि मंत्रेषु प्रकारूपत इति प्रतिप्रधानं करणाकांक्षोत्थापकत्वादनुषंगः । पूर्वयोरपि सिद्ध इत्यनुषंगाधिकरणम् । अग्नीषोमीयपशौ
स्तमंजन मंत्राः सं ते वायुर्वातेन गच्छतां संयजत्रैरंगानि सं यज्ञपतिराशिषेति हे पशो तव वायुः प्राणो वायुना संगच्छतामिति प्रथम
स्य मंत्रस्य योजना । संयजत्रैरंगानीति द्वितीयमंत्रः । अंगानि हृदयादीनि यजत्रैः यागैः संसृज्यमानानां गच्छतां पथ्यंतामिति सादृश्ये लौकिकं पदमध्या
हर्तव्यमत्र गच्छतामिति सनुषंगस्य भवतीति गच्छतामित्येकवचनस्य अंगानीति बहुवचनांतेन संबंधायोग्यत्वात्तेन च एकवचनेनास्यानुषं-
गायोग्यत्वे विपरिणामात्रस्यानुषंगो वा लिंगविवाच्यः । प्रकृतिप्रत्यययोरेकस्यासंबंधे सत्यपरस्याप्यसंबंधनियमेन धातुमात्रस्यानुषंगयोगा
त् अतो द्वितीयमंत्रे गच्छतामित्यस्यानुषंगो न युज्यते । तृतीयमंत्रे संयज्ञपतिराशिषेत्यस्य अनुगच्छतामित्यनुषज्यते न चेति संशयः । साकां
क्षत्वाद्योग्यत्वाच्चानुषज्यत इति प्राप्ते सिद्धांतयति । अथवा पान्नानुषज्यते बुद्धिपरिवृत्तिनिरूपसन्निधानत्वेन अनुषंगे बीजमुक्तं अत्र तु अंगानि सनेन
गच्छतामिसन्नपायोग्येनव्यवधानाद्बुद्धिपरिवृत्तिजिंगादसंगसन्निधानात् संयज्ञपतिराशिषेत्यत्र विपरिणामेनानुषज्यते न च गच्छतामिसेक-

वचनांतं बहुवचनांतं तथापि पतितिलतमंगानीत्यनेनाप्यन्वीयुनाक्षितेवाचं । प्रकृताव हाभावस्यनयमस्यस्त्रीतीयेऽप एवं लिंगविकारोपदेशाप्रतीये
तेसाधिकरणोप्यवस्थापयितुमशक्यत्वात्तस्मात् तीयमत्रे विनांगवंगरक्तिप्यवाच्याधिकरणं ॥ इति श्रीमदनन्तसंततसमानरूपेनकर्मबो
दशास्त्रस्थवकाकूणघनेकरणाविराजमानमहाग्निविलसितप्रौढापरिमितमहाध्वरस्य श्रीशाहजिशरभजित्तुकोजिवोत्तमहीमहेन्द्र
यामासपदुरंधरस्य श्रीमतआनंदरायविदुषा सर्वभौमस्यपंडुरूबीपोष्मेणावालस्ववतद्यानिर्वर्तितापरिमितमहाग्निविजृंभितसर्व
पृष्ठाप्तोर्यामवाजपेयादिप्रमुखसोममखसंतर्पितशतमुखवह्निमुखेनमहादेववाजपेययाजिसुतेनानयरुगिभजातेनअपारपद
वाक्यप्रमाणपारावारपारीणाय्यजनभविश्वेश्वरवाजपेययाजितोलघ्वविद्यावेशधेनवासुदेवदीक्षितविदुषाविरचितायामध्वरमी
मांसाकौतूहलवृत्तौ द्वितीयस्याध्यायस्य प्रथमः पादः ॥ श्रीगोरिकेश्वरायनमः ॥ ग्रंथसंख्या १००० श्रीगणेशायनमः ॥ रुजमु
पोद्घातप्रसक्तानुप्रसक्तं रहानीमध्यायार्थो भावनाभेदः प्रस्क्ययते । संति सोमेन यजेत दाक्षिणानि जुहोति हिरण्यमात्रेयाय ददाति प्रउ
गं शंसति आज्यैस्तुवत इत्यादिवाक्याताम्नित्र किमेकैव भावना धात्वर्थानिरूपका विधीयते उत तत्तद्धात्वर्थनिरूपकाभिन्नैवेति संशयः ए
कैवेति ब्रूमः यद्यपि प्रतिधात्वर्थं भावनाभेदस्यात्तर्हि भावनाभेदादपूर्वमपि भेदेन कल्प्यं स्यात् न हि भाव्यापूर्वभेदमन्तरेण भाव
नाभिधते । क्रियाणां फलापवर्गित्वेन फलभेदमन्तरेण क्रियाभेदस्यासंभवात् न च शब्दान्तरत्वेन भावनाभेदसिद्धिः एकापूर्वकल्प
नागौरवमपि प्रामाणिकत्वान्न दुष्यतीति वाच्यं न हि धातुभेदो भावनाभेदमुपैति भावनाया धातुवाच्यत्वाभावात् अन्वयेन हि भावनाभिधीय
ते । सा च सर्वत्रैकैव । अत एव तदर्थस्य भावनायामनभेदः तत्प्रत्ययार्थत्वादुपनाप्त्रयानं धात्वर्थस्तु न त्वगुणाभूतः । न च गुणभेदेन प्रधानर

भेदोयुज्येन च भावनाया अपूर्वं प्रति गुणत्वेपि नेदृशा यथा अपूर्वभेदः एवं गुणभूतधात्वर्थभेदादपि भावनाभेदः किं न स्यादिति वाच्यं वैषम्यात् आख्या
तेन हि भावना धात्वर्थक्रियातेन प्रतिपादनात् तत्कारकत्वमेव धात्वर्थस्य न तु पूर्वं विशेषणत्वं ततश्च फलापवर्गक्रियाणां तद्भेदेन फलभेदेन आवश्यकेः न
तु कारकभेदे क्रियाभेदः अरुणैकहायन्यादिकारकभेदेपि रूपभावनाया एकत्वात् तस्मान्न धात्वर्थभेदो भावनाभेदप्रयोजकः न चोत्पत्तिशिष्टे
क धात्वर्थविशिष्टाया भावनाया धात्वंतरेणार्थांतरे बोधनयासंभवात् कथं भावनैक्यमिति वाच्यं फलवाक्ये हि धात्वर्थविशिष्टपाके वलभावना
विधीयते अन्यत्र तु तस्या भावनाया धात्वर्थो गुणो विधीयते तथा च फलवाक्यैकवाक्यतापन्ने सर्ववाक्यो मिलिते सर्वधात्वर्थविशिष्टाया एकाभा
वनाया विधीयत इत्यविशेषः न चैवं सर्वेषामपि धात्वर्थानां भावनाप्रतिकरणोपपत्तौ न किंचिदप्यंगं स्यात् तथा चेतिकर्तव्यतांशस्यालाभा
त् भावनानिस्वरूपस्यादिति वाच्यं समिधो यजति तनूनपातं यजसाज्यभागौ यजती साघसकृच्छ्रनपर्यायपातथाजरक्ताभावनाभेदस्या
त्रिमाभ्यासाधिकरणे साधप्रिप्यमाणतपानच्छिधिप्रिति कर्तव्यतालाभात् सोमवनाभरणागवादिद्रव्यसिणाप्यसंपृहमात्रेयोप
कल्पनादि लौकिकेतिकर्तव्यताया अर्थादेव लाभात् तस्मादेकैव भावना विधीयत इति प्राप्ते सिद्धांतयति शब्दांतरे कर्मभेदः कृतानु
बंधत्वात् शब्दांतरे धातुभेदे भूयमाणे कर्मभेदः भावनाभेदः प्रतीयते कुतः कृतानुबंधत्वात् कृतः अनुबंधः धात्वर्थेन अवच्छेदः यस्य
भावनारूपस्य कर्मणः तत्कृतानुबंधत्वं तस्य भावस्तत्वं तस्मात् अवच्छेदकीभूतधात्वर्थभेदादिति यावत् अयमाशयः यद्यपि यद्यपि प्र
मयः एकः तथापि पत्लिकि विशिष्टालङ्कृते एव सप्रयुक्तेन केवलः एवं च यथा ज्ञानं स्वयं विषयानुरूपाकारं जनकं भेदं लभते एवं भावनाया अ
प्यनुरंजकधात्वर्थाधीननिरूपणतया धात्वर्थभेदाद्भेदो न्याय्यः न चानेकविषयाज्ञानके समूहालंबनवद्भेदः किन्न स्यादिति वाच्यं स

२२

सर्वेषां हि विषयाणां युगपदिन्द्रियसन्निकर्षोत्पत्तं भवत्येकत्वानानुरागः। न त्वत्र युपपन्नानां धात्वर्थानामेकभावनानुरागत्वं भवति॥ समुदितेभ्यो
धातुभ्यः प्रत्ययस्यैकस्य विद्यमानत्वात् केवलस्य चाश्रयणात् यदि हि केवलः प्रत्ययः प्रयुज्येत केवलाश्च धातवः प्रयुज्येरन् तत उभयोर्युग
पदेव धात्वर्थानामेकभावनानुरागः क्रीणाति विक्रीणाति हिंसक्षुरस्य प्रकृष्यते अश्वराणामादयश्च अश्नोऽस्तीति मा दृष्टिर्युगपत्क्र-
य भावनाधृ विशेष्यन्ते नैवमत्र केवलस्य प्रत्ययस्य प्रयोगोऽस्ति न च प्रत्ययवाक्यो धात्वर्थविशिष्टया केवलप्रत्ययश्रवणात् अनुभाव
नामनुष्ठेयपालयमात्रविधिरिति युज्यते च क्व विनिर्गमनादिरहात्। सर्वेषां पदानामेकप्रसक्तेन फलवाक्योऽसम्भाभावनाप्रत्ययेना
नुष्ठप्रकृत्यशेषे सर्वांशफणालेन विधीयत इति केऽस्मिन् यास्ययुक्ता वायत्विसमुदितेभ्यो धातुभ्यः एक एव प्रत्ययः प्रयुज्येत तदापि भावे घ
गपदेव धात्वर्थानामेकभावनानुरागः इह होमचरुं वर्धयत्। अग्नीषोमाविसाहौ हि इहाद्विभक्तिः च्यूयते। न तु प्रत्ययेकाए एकैकस्याद्दृ
ष्टात्। अत एव तत्र हि लाद्यिकं समुदितेरेव प्रातिपदिकार्थविशेष्यन्ते। प्रकृतेतु न समुदितेभ्यो धातुभ्यः प्रत्ययस्य श्रवणमस्ति। प्रत्ययकमेव
त्यस्यश्रवणात्। तेषां च प्रत्ययोपादिपर्यन्ते समाराः केवलयागकरणको भावनाम्नुसाए कपाहाया ततरूपपाविषते। होमहानादपस्त
त्यधात्वर्थास्तस्यामेव भावनायामविशिष्यमानाः पद्यान्तरगतत्वाद्धाकैन सन्निधिरूपप्रकरणेन वा निवेश्यन्ते। नयाचरुर्वर्तामपावा
कः प्रकरणाभ्यां प्रबलाया अश्रुतेर्बाधिस्यात्। न च समपि श्रुति प्रावृत्ये एकस्य करणत्वेनेतरस्यांगत्वेन निवेशे विरोधाभावान्नवा
धरतिवाच्यः सर्वेषामेव भावनान्वयेऽस्ति विनिर्गमनाविरहणात् सर्वेषामपि करणत्वापत्तावेकस्य करणत्वमितरस्य तदंगत्वमिल
काशोपनिपातेन विरोधस्सत्वात्। न च समुच्चयसंभवान्न विरोध इति वाच्यं समुच्चये सति नैरपेक्ष्यविरोधात्। यजेनेत्यादिश्रुतिप्र

राम: २२

पाभ्यांधात्वर्थभावनयोर्विशेष्यत्वसाध्यसाधनभावावगमान्नसमर्थःपदविधिरित्यत्रप्रत्ययविधावपिप्रसंगेसंभ्युपगमात्‌यथाचैतत्तथोक्तमर्था
हाकल्पनेकेदशसादिसर्वपदवीप्साप्यतेनचयथाश्रग्नेहान्नेपुरोडाशमष्टाकपालंनिसाहेपद्मविधम्‌क्रिंश्रवलोपिसत्रसविशिष्टचाग्निलस्य
णाद्वनाकारकमेकतद्धिदिहार्थीकिंनस्यादितिवाच्यं।हान्तशब्दसरस्याविभक्तेर्विशेषणत्वविभक्तिलेनसाधनत्वार्थतयातत्रसमस्यापिए
पूर्वकृत्सयुपत्रसवत्तोविशिष्टैककारकविधिसंभवे।विप्रकृतेविशेषणविशेष्यभावाभावेनदयाक्तसयपश्रवलत्वस्यविशिष्टैकभावनाविधि
बाधकत्वात्‌।एवंचविशिष्टविध्यसंभवेसमस्तरंजकधात्वर्थभेदाद्याभावनाभेदसिद्धिःप्रयोजनंपूर्वपक्षेयागहोमादीनांसमप्राधान्यसि
द्धांतेतुभावनाभेदात्सोमयागस्यैवप्राधान्यंहोमस्तुहोमादीनांतुफलवत्सन्निधावफलंतदंगमितिन्यायेनतदंगत्वमिति।इतिपाददो
तदाधिकरणं।समिधोयजतितनूनपातंयजतिइडोयजतिबर्हिर्यजतिस्वाहाकारंयजतीतिपंचकृत्वोयजतिपदंश्रु।तंनतिकिंकर्मभाव
नाप्रतिपादयतिउतनप्रतिपादयतीतिसंशयः।एकाभिधीतिब्रूमः।प्रसयाशस्यैक्येपिप्रकृतिभूतधात्वर्थरंजकभेदात्सपाथोपि
भावनाभिधतरस्कंधहेतुप्रकृतसर्वस्यापियागस्यैकत्वात्तुकर्मभावनाभेदः।नहिपुनश्रवणमात्रेणशब्दस्यार्थोभिधीयतेन
देवहिपदंपुनश्रूयतेश्रभेदेनप्रसमिधानात्।नानापत्।नचशब्दस्यभेदंविनानतदर्थभेदःप्रमाणिकः।तस्मान्नात्रभावनाभेदः।ननुमा
त्सभ्योसाकर्मभेदःलाघवःसमिधादिसंज्ञाभेदात्कर्मभेदःस्यात्।अग्नेयेयज्ञोतिरवैयतिज्योतिरित्यादौसंज्ञाभेदात्कर्मभेदस्यसंज्ञा
वोमस्तिसयोगादिसवांतपदमेववस्यमाणत्वादितिचेतन्नेषदोषःसमितनूनपादादिशब्दानांहिसगुणत्वेनपदषष्ठ्यःसंज्ञाता
वगमानएवंकिमभेदोवगतोनवेतितद्वितीयः।नहियागैकत्वेसतिस्रायमिकसमितसंज्ञाभेदेनमिमागेनतनूनपादिसंज्ञान्तरं।

निवेशाद्योगस्य न च पदस्य मध्योर्वर्ण्यमानेन यान्तनूनपान्नराशंसानां संज्ञात्वस्यैवासिद्धेः न द्वितीयः संज्ञात्वावगमात्पूर्वं कर्मभेदस्याह
कप्रमाणाभावात्तच्छ्रवणस्य च षट्त्वेन भेदप्रसक्तितास्सिद्धय जिघाले कत्वलब्धयागैकत्वविरुद्धत्वेन भेदप्रयोजकत्वाभावात् एवं
वृतनूनपान्नराशंसानां संज्ञात्वावगमे कर्मभेदः कर्मभेदावगमे च संज्ञात्वमिति तेषां संज्ञात्वमित्यन्योन्याश्रयः अथैवमन्योन्याश्रयेऽपि विभ्र
ज्ञोऽतिरिक्तस्य तु यागस्य प्रमाणाभावात्तत्र यागभेदावगमं विना संज्ञात्वावगम एव दुर्घट इति वर्ण्यते। उद्भिदादिपदे न त्वोद्भेतृधातुपर्यालोचनया विप्र
कृष्टविधानादितो पूर्वसंगेन गुणविध्यसंभवादेव संज्ञात्वनिश्चयः इति प्रागेव निरूपितं अत्र तु तत्रापि यागभेदावगमात्प्रागेव
संज्ञात्वावगम इति वैषम्यं। न चैवमपि यजतिपदस्य पुनःश्रवणानर्थक्यं सन्निधानेन तनूनपादादिदेवताविधानार्थत्वात्। न चैवमपि गुणा
देवभेदसाधुत्वान्नापूर्वसंयोगस्याधिकरणे गुणस्यापि कर्मभेदकताया अङ्गीकृतत्वात्पूर्वमेव वर्ण्यमानत्वादिति वाच्यं। वैषम्यात् गुणाधिकरणे हि
उत्पत्तिशिष्टगुणावरुद्धे कर्मणि निवेशमलभमानः कर्मभिन्नत्तीति वर्ण्यते प्रकृते च सन्निधानात् संज्ञकेकर्मणि तनूनपादादिगुणा
उत्पत्तिशिष्टास्संभवन्निवेशाः कथं कर्म भिन्द्युः दध्नादि च तत्र अग्निहोत्रं जुहोतीति द्रव्यासंयुक्तोत्पन्नकर्मणि वादेन विधीयमाना हि दध्यादय उत्प
नेशिष्टास्संतो न कर्म भिन्दन्ति न च तनूनपादेव आज्यस्यवेत्वित्यादिमन्त्रवर्णादेव तनूनपादादिप्राप्तेस्तद्विधिरनर्थक इति वाच्यं। एकस्यैव
यागस्य मान्त्रवर्णिकदेवतावलम्बनेन तनूनपादाद्यनेकदेवताकत्वेन प्रशस्ततायां यागद्वये वं तु सर्वत्वेन सार्थक्यात् यद्यपि तु सर्ववाक्यं म
नर्थकप्रायं तथापि दृष्टतरभेदप्रसक्तिनिरासकत्वेन कर्मैकत्वस्य साध्यत्वेन तत्र दोषावहं। न हि प्रमाणस्य रसान्तप्रतीयमानप्रयोजनान्तरसा
रेणापरस्य कुमतिं तं न च सन्निधिकाम्यमेव विधिः इतरे तु सर्वथा दृष्टस्य विनिगमनाविरह इति वाच्यं। प्रथमश्रुतत्वेन सन्निधिवाक्यस्यैव विधायकत्वात्।

अप्रमेयत्वेनतेषांवस्तुसामर्थ्यतायाउचितत्वात्तस्मादेकोयागः नदेकत्वात्भावनैक्यमितिप्राप्तेसिद्धांतयति। एकस्यैवंपुनरुक्तिरविशेषादानर्थ
क्यंस्यात्तत्सन्निधौयजीसाहाय्येएकरूपजनने पुनरुक्तिरप्येवंशब्दांतरवज्ञेद्दिका। हियस्माल्लकारेणोद्देशाभावेविधेः पुनश्रवणमनर्थकंस्यात् नव
स्तुसामर्थ्येनसार्थकत्वंशंक्यं। अप्रवृत्तप्रवर्तनंहिविधिरतेसभावास्सिद्धः। एवंविद्वानपौर्णमासीयजतइतिविद्वद्वाक्यंतुरूपालाभाद्भवद्बुध
कात्तत्वास्त्यक्तमितितिवहस्तेनवाचनिकं विरोधकमुपलभामहे। अतस्सभवस्यामप्रवृत्तप्रवर्तनात्मकतायामनर्थकप्रायंवस्तुसामर्थ्यंतत्प्रयुक्तमा अ
प्यितुं अतः कर्मभेदएवयुक्तः नचेहाप्यिदत्त्वप्रत्यभिज्ञेनवाधिकेतिवाच्यं। प्रत्यभिज्ञाहिसएवबायंयजतिरि[illegible]कारा। नतुयजतीत्यत्राएवय
जतिश्रुत्यागम्यते। ननुसोयमितितत्वांगः सोयमितिअभेदहेतुः पदांतरसन्निधिकृतत्वात्। नहिसन्निधिकृतप्रत्यभिज्ञयाविधिश्रुतिकृतकर्म
भेदस्यबाधस्संभवति। तस्माद्विधिश्रुत्याकर्मभेदः एतेनसन्निधिकृतप्रत्यभिज्ञायाअबाधायपुनश्रवणंगुणविधानार्थमितियदपिजैमिनिस्संयोगक
रणीकाद्धिभावनाप्रत्ययश्रुत्याविधीयतइतिकर्मविधौमत्स्यग्रहः सन्निधिकृताभेदप्रत्यभिज्ञाबाधात्सन्निधिबाधश्चगुणविधौतुनतत्पाद
दृशणाम्रूढपप्रयोगार्थत्ववाक्येनविधानंसन्निधिकृताभेदप्रत्यभिज्ञापाअबाधश्चेतिसन्निधिवाक्यप्रमाणयोरनुग्रहः। अतिबाधश्चानचैतदु
जतेदुर्बलाभ्यांसन्निधिवाक्याभ्यांश्रुतिबाधस्यायुक्तत्वात्। नतद्धाजुहोतीत्यादौसन्निहितप्रत्यभिज्ञाबलादेवधात्वर्थभावनयोर्विधिर्बाधि
तापादितंतदर्थस्यदध्यादेर्विधानमंगीकृतं। नतद्वदिहापिकिंनस्यादित्यतआह अविशेषादितिदध्यादिवद्विधेयविशेषस्याभावादित्यर्थः। द
ध्यादेरविधानेदध्यादिपदानर्थक्यापत्तातद्विधानावश्यकत्वेअनेकार्थविधानाशङ्कयाकर्मान्तरंवाहात्वाक्यांसन्निधिकृताभेदस्तानंदध्या
द्विविधिरुत्पन्नतेनैवंतत्रतपातमित्याद्दिपदंतद्विधाभावेअनर्थकं। मंत्रवर्णप्राप्तदेवतोयजीत्विनेन्द्रामहेन्द्रयत्पार्थक्यसंभवात्। एवंच

प्रसवगतं कर्मविधानं न बाधितव्यं भवति। अतो यागभेदाद्भावनाभेदः। तद्धेतावपूर्वभेदः इति सिद्धं। अत्र ब्रूमः। समिधो यजतीत्येवं विधिः। तनूनपातं
यजतीत्यादयोऽपि वाक्यादिति पूर्वपक्षस्य कथमुन्मेषः। एषु त्वेकनिवेशित्वात्संख्यया कर्मभेदः स्यादिति वक्ष्यमाणन्यायेन संख्यया कर्मभेदस्य
निश्चितत्वात् वाजसनेयके हि देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त ते ह उपक्रम्य ते देवा अर्चंति श्राम्यंत एतान्प्रयाजानपश्यंस्तैरय
जंत तैर्ऋतून्संवत्सरं प्राजनयन् ऋतुभ्यः संवत्सरात्सपत्नानन्तरयंस्तस्मात्प्रयाजानामप्रजया ह वै नामैते यत्प्रयाजा इत्याहुस्तस्मात्प्रयाजेभ्य
ऊतन ऋतवो वै प्रयाजास्तस्मात्पंच भवंति स उपक्रम्यत आग्रह विषो भवंतियज्ञेवति स्वं प्रयाजेभ्य आप्नुवन्नत एव नायकामेन आश्राव्याह
समिधो यजेति यजनयजे से वो तरगाहस्समिधो यजति अथ तनूनपातं यजति अथेलो यजति अथ बर्हिर्यजति अथ स्वाहा स्वाहेति यजति वे
तुर्यं स्विति यजत्युत्तमे प्रयाजे पार्वंति हवींषि भवंति स्वाहा स्वाहेत्येवता नियजति उत्तमं प्रयाजमिष्ट्वा हवींष्यभिघारयति प्रथमे प्रयाज इष्टे
ब्रूयादेको मम एकांतस्येति द्वितीये द्वौ मम चेतस्येति तृतीये त्रयो मम चेतस्येति चतुर्थे चत्वारो मम चेतस्येति पंचमे पंच मम न तस्ये
काचनेति उत्तमान्प्रयाजानावहयंति प्रथमान्यजतीत्यादि श्रूयते तत्रोत्तमौ प्रयाजाविति बहुवचनेन संख्यया कर्मभेदस्यावगतत्वात्कर्मै
कापक्षस्यानुन्मेष एवा कर्मैकोऽनयन्नेवतिष्ठन्प्रयाजेभ्य आश्रावयेत्तत एनापक्रमेत यजयजेत्युत्तमे प्रथमे प्रयाज इष्टे उत्तमं प्रयाजमि
घूसादिश्रनुपपन्नं स्यात्। अथ तनूनपातं यजति अथेड इति प्रतिपदमपशब्दाश्चासपंजसाश्रुः तथा सिद्धांते समिदादिशब्दानां नाम
धेयत्वकथनमप्युक्तं अन्यान पक्षात्। नाम्नां हि बलादपि योगानभिभाव्यादेः स्थितानि तत्र संक्रमलिंगकरणादवनेनाह पक्षमिति लघू
पीयेनाख्यानयेकल्पवसंपिदादियागानामंगभूतानां संकल्पो नास्ति लिंगकरणं वास्ति। दर्शपूर्णमासावारभ्य समाम्नातानामारभ्याधीयामि

छिंद्येद्वपतीति फलविद्गुणोपबन्धः फलं न चात्र समिदादिशब्दोपबन्धेन किंचिद्विधीयमानमस्ति न च समिधः पुरस्ताद्यजति तनूनपातं द्वितीयेन
तृतीयस्मादिगुणोपनेयः फलमिति वाच्यं तत्प्रधानस्य कर्मसंज्ञानकं स्वेति व्याकरणो वलेनाग्निं यजति इडं यजतीत्यादिवद् द्वितीयाया
स्संप्रदानत्वार्थकतया समिदादिदेवता येष्वाहुति माहवनीयस्य पुरस्ताज्जुहुयादित्येवमर्थपर्यवसानेनाहो षात दर्शपूर्णमा-
साभ्यां स्वर्गकामो यजेतेति फलोपबन्धः न चांगभूतानामेतेषां फलोपबन्धसंभवः अथैषज्योतिरित्यादौ कर्मभेदे फलं तत्संख्यायाचात्र कर्म
भेदसिद्ध्यं तथाच नामधेयत्वे प्रयोजनाभावाद्देवतासमर्पणाद्गुणविधानार्थत्वमेव समिदादिवाक्यानामुचितं समिदादिशब्दानां वस्तु
तानामतं संकर्षकांगदेवगतानां तत्र हि द्वितीयाध्यायस्य द्वितीयपादे तत्र देवतानामादेशो न विधते नाम्नानादिति पूर्वपक्षसूत्रे यजे
क्षिप्याज्याप्रैषे देवतानामधेयजादेष्वमिति पूर्वपक्षस्थापिता विधते वा नामार्थदर्शनेभ्य इति सूत्रेण यत्तनूनपातं यजे ऊं यजेतीष
णाङ्गापि स्यादिति प्रयाजेषु देवतादेशस्य निर्देश्यात इतरत्र देवतादेशविधिरनुमीयत इति सिद्धान्तयिता आम्नातः प्रयाजेषु देवतादेशत्वस्य
प्रतिषेधो वचनाभिन्नेर्दिष्टेति गणसूत्रेणाशास्त्रान्तरे तनूनपातं यजेत्यादिप्रसक्तविहितस्य देवतादेशस्य पुनः तनूनपातं यजेत्य यजेति ब्रूयादिति नि
हात्रन्तः प्रयाभ्यो मन्त्रेन देवतादेशः आश्राव्य ब्रूयादिं यजेति आश्राव्य ब्रूयान्मरुतो यजेतीत्यादिवचनाभावे समीत्याहिप्प आम्नातो वै केषां
दर्शपत्समुख्यात्र तु ब्रूयमुपजेतीति सूत्रेण सर्वेषां प्रयाजानां प्रैषाहो देवतादेशकर्तव्यत इति शास्त्रान्तरे प्रसक्तविहितं धकविदिं द्रंयजेत्यादिवचनं त्व
नेपादृत्तिसमाहितं नेवसपिधो अथ आजस्य विधृतिसादिमन्त्रवर्णानि एवनाम्नाहे एनर्थक्यमिति वाच्यं हे अग्ने समिधः आज्यं प्राप्नुवृ-
लित्पे वमग्ने हव्यादग्राधा मान्मन्त्रस्तु सलक्षणं देवतात्वसाध्याहानां तु हविर्भागित्वलक्षणं देवतात्व मिस्तु भयषाम पि देवतात्वेन पसे-

देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्निति संकर्षकाण्डवक्ष्यमाणा देवताशब्दध्यानादिकार्यमग्निशब्दस्य निवर्तयितुं समिदादिदेवता
विधानस्यावश्यकल्प्यत्वान्न चैवं सति कौषीतकब्राह्मणे देवासुरा एषु लोकेषु संयत्ता आसुस्तेभ्योऽग्निरपाक्रामदिति धामस्तु समस एतं वरं वव्रे
प्रयाजान्मेऽनूयाजांश्च केवलान् घृतं चापां पुरुषं चौषधीनामिति तस्मादाहुराग्नेयाः प्रयाजानूयाजा इत्यादि साग्निदेवत्वस्य तत्रावगतविरोध
इति वाच्यं अत एव विकल्पोपपत्तेः वस्तुतस्तु समिधो यजतीत्यादयो होतृयाज्याविधय एवेत्युचितं आश्राव्याह समिधो यजेति यज
यजेत्यनन्तरं समिधो यजतीत्याद्याम्नानात् समिधो यजतीत्याद्युपवस प्रैषानन्तरं होतृयाज्याक्रमणस्यैव प्राप्तावसरत्वात् स
मिधो यजेति संप्रेष्यन्हि होता समिधो याज्यया प्रकाशयेत् इत्यर्थः देवतोद्देश्यपद्रव्यत्यागे होतुर्नियोजनासंभवात् समिधो यजतीत्यादेर
प्ययमेवार्थः। समिधः समिधो अग्न आज्यस्य वियन्त्वित्याद्या याज्या वक्ष्यन्तीति यथावस्थितानामाग्नेयाः प्रयाजा इति कौषीतकब्राह्मणाद्याग्ने
ग्निदेवत्वे समिधो यजेति संप्रैषाघटकपदानि इति वाच्यं तत्राग्निशब्दस्य समिदादिनामकाग्निविशेषपरत्वेनाविरोधात् संकर्षकाण्डे हि
तीयस्य द्वितीयपादाधिकरणे सत्यपि एतेनेध्मेन समिधो यजेत्याग्नेयमेव तद्रूपं परोक्षं यदग्निं यजेत्येवमाह समाप्यो ह्यग्नस्तं अतैव स
मिदादयोऽग्निविशेषाः प्रयाजदेवताः इत्युपक्रम्य महाभाष्यकारीयं वेदभाष्यं सायणादिशब्दानां तथैव व्याख्यानात् तत्राच्युत यथा समिध्यन्ते ये
न भावाः स समिद्भवति कोऽग्निः न ह्यग्निमावाहेषु उपलभ्यते वृक्षं भवति वृक्ष समविवृक्षितः समिधो वै हूविरिति यजतीति वृक्षस्य इवशब्द
तापादेमोऽर्थिक तत्त्रयोजनगतः हे अग्ने आहवनीय समिधा वा संतिके अग्निरेषः स्रुविर्यन्तु आभोक्ति स्यार्थः तनूनपान् इत्यापन्ने गमो
अपात इत्यां संकोचं इत्याग्नेय्योऽग्निः न ह्यग्निमावाना नाश्यो भवति इमपत्रं करोतीति इट्ट्वा विषिकोटितैः नकरोतीति त्रिविशिकापिरूपन

रग्नेः सस्याघुरुवत्निवहुतममविवक्षितं। इजोवहुरिवयजतीति ब्राह्मणं। ब्राह्मणादग्नेः शारदोग्नेः न हा हि भावाद्वहंति। स्वाहाशब्देन दाहो लक्ष्यते। तं करो
तीति स्वाहाकारः। हे मंत्रिको ऽग्नेः न दारवलदहिमा ग्नेनाभावाद्दग्धा अवसन्ना भवंतीति। यद्वा समिदादिशब्दाः कुसुमसावसंतादिपराः। वसंतो वै समि
त् ग्रीष्मो वै तनूनपादित्यादिवाक्यशेषात्। तथा च हे अग्ने समिदादिशब्दवाच्या वसंतादयस्त्वाज्यं प्राप्नोतु सवसंतादिलुप्तमपि दास्यस्य धर्मः अन्यथा।
अग्ने इति संबोधनस्य वैयर्थ्यापातात्। अत एव वाजसनेयके श्रूयते वो ह वै यज्ञे देवेषु भागमीषिरे इत्युपक्रम्य श्रूयते। ना। हारग्निरूपामंचपांचक
ते होचुः कं भागमभ्येयामेति स होवाच प्रथमानेव वो यज्ञेन यजामहा इति तथेति होचुस्त्वा वयं नाम सुभजामेति यो नो यज्ञे देवेषु भागमविद
इति स एषो ऽग्निः मनुष्ठानवाभक्तः समिधो अग्ने तनूनपादग्ने इलो अग्न इति दक्षिमंनसस्य वै प्रयाजा अन्वाभक्तो ह वै नस्मांसाधुरुसाया
मिसादिस्त्वतो ऽग्निरेव सत्वप्रतिपादनपरः कौषीतकब्राह्मणस्यापि न विरोधः। तस्मात् समिदादिवाक्यानि याज्याविधिपराण्येव। अत एव देवा ह वै
यज्ञं तन्वाना इत्युपक्रम्य तमेतान्समिधो ऽत्र मे प्रयाजे स्वाहाकारेण सर्वं यज्ञं संस्थापयन् स्वाहाग्निमिति न दाग्नेयमाज्यभागं स्वाहा सोममिति ग
सौम्यमाज्यभागं स्वाहाग्निमिति न दाग्नेयमष्टाकपालं पुरोडाशं योयमुभयत्राच्युतो भवति स यथादेवतं स्वाहा देवा आज्यपा इति तत्प्रयाजा
नुयाजानाह जुषाणा अग्न आज्यस्य व्यंतु इति तेन त्रिविहूतं न स्मा इत्त मे प्रयाजे यावंतो हवींषि भवंति स्वाहा स्वाहेत्येव ता नियजतीति याज्या
वास्वाना न पुरःसरमुत्तमप्रयाजमन्वेव इति शब्देन तदुपि स्वंगच्छते। कर्मविधिपरत्वे तु न इ संगतिः स्यादेव। तैत्तिरीयके ऽपि सत्संप्रपद्य इ
ति मंत्रस्याम्नायस्य कृत्स्नस्य विनियोजकं ब्राह्मणं देवा नेचुं अग्ने यद्धोता एषः अग्ने महाँ असीत्याह त्रीं स्वानं तु ब्रूयात् निवीतं मनुष्याणां
समिधो यजति वसंतमेवर्तूनामवरुंधे एते यज्ञस्य प्राणाः प्रयाजा यद्यष्टौ वा इडाः स्वयं अग्नी यस्माद्धाति देवा वै यज्ञस्य स्वतः नयादित्तः पंचभिरि

वाकैरग्निर्होतावेतस्मिन्निति स्त गार्हपत्ये निगदं ते पंत्रे समाम्नाये विनियुक्तेन द्वनंतरपठितास्तमिधोअग्नआज्यस्यवेत्विसादिमंत्रास्तमिधोयजतीस
नुवाके विनियोज्यं तद्दृत्विक्तिंचस्रुचीवाएनेयत्तस्येपनुवाकेनद्वनंतरमंत्राणामन्त्रिरेवचार्त्तीसादिनाम्नच मनू आज्यभागस्यजुषाणोनयजति
मद्धेन्वतीपुरोनुवाक्याभवतिनियतस्मायजतिपुरस्ताद्धत्स्याःपुरोनुवाक्याभवस्य पनिष्ठाल्क्ष्मापाज्येतिविनियोगवचनाद्व मध्येआघारमाघा
रयतियभिक्रामंजुहोतीसाघाध्वर्युर्वाम्नानंतुप्रासंगिकंतथावाहूवेतसेकोपीतकत्राह्मणहोत्रैकविधिपरे अथपुरस्तात्सामिधेमीनांतप
तीतिप्रस्तुतस्तमिधेसतवाचनादित्स्तुगार्हपत्यानांतमनुक्रमस्पप्रयाजान्यजतिततवै पंचभवंतिसमिधोयजतितनूनपातंयजतिइलोपजव
र्हियजतिस्वाहाकृतिमंततोयजतिऊर्जमेप्रयाजेदेवतास्तमावपतिपौर्णमास्यांवात्रघ्नौवाज्यभागौभवतोमावास्यायांवृधन्वंतोअग्निः
प्रथमंदेवतानांयजति अथपौर्णमास्यामग्नीषोमौयजतीसादिनस्मात्सपिशद्विवाक्यानियाज्यादिविधिपरणपेवेतिवेदार्थरूपनकुशला
मीमांसकशिरोमणयोविदांकुर्वंतु अधिकरणास्योदाहरणंतु वाजप्रसवीयंजुहोतिराष्ट्रभृतोजुहोतिवामनगामानिजुहोतीसाधुदाहा
धृद्दस्याभ्यासाधिकरणं पदार्थयोशककपालोमावावपौर्णमास्यांवाच्युतोभवतिताभ्यामेतमग्नीषोमीयमेकादशकपालंपूर्णमासेप्रा
युच्छत्तुउपांशुपाजयंतएयजतिनावतृनापयीषोमावाज्यस्यैवनावुपांशुपौर्णमास्यांयजनऐंद्रद्ध्यमावास्यायामैंद्रपयोमावास्या
यांमितिकालसंयुक्तानिवाक्यानिअग्नये तेतथाप्रयाजान्यजसाज्यभागौयजतितद्विशकृतंयजतीसादीन्यकालसंयुक्तानितत्सन्निधा
विद्माम्नायतेपएवंविद्वान्पौर्णमासीं यजनेपएवंविद्वानमावास्यांयजनतद्देनितत्रसंशयः किमत्रयजतिअपूर्वयोःकर्मणोःपौर्णमा
स्यमावास्यासत्तंकयोर्विधातातदेनाग्नेयादियागानांकालसंयुक्तनयामूमानांतादशाकालरूपप्रवृत्तिनिमित्तकाभ्यांपौर्णमास्यमा

णस्यापदाभ्यां विशेष्यमाणानामनुवादित्वादिति। विधिपुनरस्यासा विधायकावितिचेन्न। न च द्रव्यदेवतालाभात्कथं यागांतरनेतिवाच्यं सर्वस्मै वा
वा एतं गृह्णाति यज्ञस्तेन यद्वापाज्यमिति द्रव्यलाभात् तथा त्रैध्रौ पूर्णमासेन ध्रुवेतेच ध्रुवीमीश्चमावास्यायामिति वाक्यविनियुक्तमंत्रवर्णितो देव
तालाभाच्च। अग्निर्वृत्राणि जंघनत्सोमासीत्वं चौ वृत्रहन नन प्रकाशिकेवात्र घ्नो अग्नेः प्रत्नेन मन्मना सोमगीर्भिष्ट्वा वयमिति त्वं चौ वृत्रहि प्रकाशकत्वाद्
ध्रुवसोमश्छंदसं रूपं अग्नये नेपुरोनुवाक्ये कि यजेनचसर्वस्मैवा एतं गृह्णायमत्यनद्दिति वाक्यस्य वैश्वदेवपरत्वेन विधायकत्वासंभवाद्दर्श
पौर्णमासदिति वाक्ययोश्च मंत्रसमाम्नाये अविशेषपठितस्य पुरोनुवाक्यायुगलद्वयस्याज्यभागयोः कालद्वयगतयोरव्यवस्थ्यु
योः प्राप्तयोर्व्यवस्थार्थत्वस्य तृतीयाध्येभिमिथ्यानर्थसंबंधरूपत्रवक्ष्यमाणत्वाच्च न ततो द्रव्यदेवतालाभ इति वाच्यं। सर्वस्मै इति
स्य घृताद्यविनत्वर्थीवत्वेन विधायकत्वेपि द्वैशब्दस्य परत्वेन याज्ञिकोपयुक्तस्यैव विधिशब्दश्रुतिवत्पकत्वाभावात् मिथ्यानर्थसंबं
धरूपस्याधिकरणस्य सिद्धांतस्य एतदधिकरणपूर्वपक्षावसरे अत्रैवोक्तत्वात्। तत्रहि वार्त्रघ्नीवृधन्वतीवाक्ययोराग्नेयादिषु मंत्रविधायकत्व
नभवतिनेत्यामग्निर्मूर्द्धेत्यादिपुरोनुवाक्यावद्द्वयोः लिंगकेवलस्य सोमस्य देवतालाभावेन सोमदेवत्यस्याज्यानुवाक्यायुगलस्य तेषु वि
धासंभवाच्चेनाप्याज्यभागयोर्मंत्रविधायकत्वं तयोः कमादेवतत्वप्राप्तेः॥ अतश्चाज्यभागयोः पुरोनुवाक्याव्यवस्थापकत्वं तद्वाक्य
योरितिसिद्धांतोभविष्यति विद्धवाक्ययोर्विधायकत्वे तद्विहितकर्मणोरेव मंत्रविधानमिमेवाक्येकर्तुं शक्नुतः। यत्रांतरविरोधस्य पु
वाधकाभावात्॥ न च सन्निधानादाज्यभागयोरेव मंत्रप्राप्तिरस्त्विति वाच्यं वाक्यतो विद्धहितकर्मणोर्मंत्रविधिसंभवे दुर्बलसन्नि-
धिविरोधेनाज्यभागार्थतायाश्चासंभवात् एवं वेदानिमाज्यभागयोः पुरोनुवाक्यायुगलद्वयस्य प्राप्तहेरेवाभावेन तद्व्यवस्थार्थत्वस्य सिद्धत्व-

स्यकृत्यमुक्तेषः। न च विद्वद्वाक्यविहिते एकैकस्मिन्कर्मणि पुरोनुवाक्यायुगलस्य कथं सन्निवेश इति वाच्यं। एकस्या ऋचः पुरोनुवाक्यात्वेन अन्यस्या याज्या-
त्वेन च समावेशोपपत्तेः। न चान्वयोत इति विरोधः शंक्यः। याज्यायाश्च पिप्रेषानंतरमुच्चारणीयत्वेन तद्विरोधात्। न चैवं सति कथमाज्यभागयोर्म-
न्त्रदेवताप्राप्तिरिति वाच्यं। जुषाणो अग्निराज्यस्य वेतु जुषाणः सोम आज्यस्य हविषो वेत्विति अनयोराज्यभागाभ्यामन्यत्र विधानाभावेन तयो-
सन्निधिप्राप्ताज्यभागांगत्वान्यायात्तत एव आज्यादेवतयोर्लाभात्। अनुवाक्याद्वयं च तयोरग्नीषोमदेवताकम्। अग्नीषोमाविमं सु मे इत्यग्नीषोमा-
हविषः प्रस्थितस्येत्यादिकमागमयितव्यम्। अतो द्रव्यदेवतालाभसंभवाद्विद्वद्वाक्यस्य अपूर्वकर्मविधायकेऽन्यथा तयोरानर्थक्याच्च। न च ष-
ण्णामपि यागानां समुदायद्वयसिद्ध्यर्थं प्रक्रमभेदेन पौर्णमासामावास्यासंज्ञाद्वयसिद्ध्यर्थं वा अनुवादः। तत्र च दर्शपूर्णमासाभ्यां स्वर्गका-
मो यजेतेति फलवाक्येन कालसंयुक्तसमुदायद्वयस्य फलसंबंधः प्रसिद्ध्यतीति वाच्यं। पौर्णमास्यमावास्याशब्दयोः संज्ञात्वेऽपि फलवाक्यगतद-
र्शपूर्णमासशब्दयोस्तत्संज्ञात्वासिद्ध्या कालसंयुक्तानामेव फलसंबंधस्यासिद्धेः। फलवाक्ये दर्शपूर्णमासशब्दयोर्न समुदायपरत्वं। यजि-
सामानाधिकरण्यात्। न हि समुदायो यागात्मा भवति किंतु समुदायापि परत्वमिति समुदायद्वयसिद्ध्यापि कालसंयुक्तानामेव फलसंबंधस्या-
सिद्धेश्च विद्वद्वाक्ययोरविधायकत्वे पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यये त्यस्यानर्थक्याच्च। न हीमे वाक्ये आग्नेयादीनां काल-
विधायके भवतः। यदाग्नेयादिवाक्यैर्देवतत्वप्राप्तेः। न च यदाग्नेयादिवाक्यैः कालसंयोगावगमेऽपि षण्णामेकैकस्मिन्नेकस्मिन्वा पर्वणि प्रयोगस्या-
ततन्माभूत् किंतु एकस्य त्रिकस्य पौर्णमास्यां सह प्रयोगः अन्यस्यामावास्यायामिति सहप्रयोगसिद्ध्यर्थं ते वाक्ये इति वाच्यं। यदृच्छया पशुना
सोमेन वा यजेत सोमामावास्यायां पौर्णमास्यां वा यजेतेति कालविधौ सत्यपि सर्वासामिष्टीनां सर्वेषां पशुबंधानां सोमानां च यथा न सहप्रयो-

गः एवमिह हविस्सर्पिकालविधेः सहप्रयोगासिद्धिः द्वादशकयोः कर्मान्तरविधायकत्वे तु नयोः कर्मणोः कालविधानेन पौर्णमास्यां यौर्णमास्येसा
द्विवाक्ये सार्थके भवतः। न चैवं सति पौर्णमासममावास्याशब्दयोः संज्ञात्वे सति ताभ्यां शब्दाभ्यां विद्वद्वाक्यविहितकर्मान्तरवादेन कालविधिः काल
विधौ च तयोस्तत्प्रख्यमायेन नामत्वमिति परस्य एवं प्रवृत्ते वा व्यं प्रवृत्तिनिमित्तानिष्ठयेपि सामानाधिकरण्ये मात्रेणाथ्येषज्योतिरिसा
दिवत्संज्ञात्वनिश्चयसंभवेनाग्नेयोमाग्नयानवकाशात्। अतो विद्वद्वाक्यविधायकोऽ एवं चाग्नेयादियागानां षण्णां विद्वद्वाक्यविहितयागयोः
प्रयाजादीनां च सर्वेषां यागानां प्राधान्यं फलति। फलवाक्यीयजिज्ञासर्वेषां यावि शेषेण परामर्शात्। न च तत्र दर्शपूर्णमासाभ्यामिति विशे
षण्णां दर्शपूर्णमासकालसंयुक्तत्व तयागविशेषपरत्वं यजेः शास्त्रां कालसंयुक्तानां यागानां बहुत्वेन द्विवचनानुपपत्तेः। न च समुदायद्वयाभि
प्रायं द्विवचनमिति वाच्यं समुदायद्वयं हि फलवाक्ये दृष्यत्वे सिद्धं न फलवाक्य एव नाद्यः। एकावगमस्य न प्रवेशेन हि कर्मणामेकसमुदाया
पत्तिः। एकावगतिश्चैकाभिधानप्रयुक्ता। न चात्रैकाभिधानमस्ति विद्वद्वाक्यप्रतीतिरेकस्यैकस्य विद्वद्वाक्यस्य समुदायद्वयस्यैकस्माद्दर्शनात्
विद्वद्वाक्ययोश्चैकैककर्पविधायकत्वांगीकारान्न द्वितीयः फलवाक्यगतयद्यतिना तन्त्राभिधानेन समुदायनिष्पत्त्यंगीकारे सर्वेषां समुदायस्यै
कत्वेन द्विवचनानुपपत्तेः। न च दर्शपूर्णमासशब्देन एकैकस्यैकस्य तन्त्राभिधानात्समुदायद्वयसिद्धिरिति वाच्यं दर्शपूर्णमासाभ्यामिति हि यजि
विशेषणत्वात्तत्सरतेत्रां यजिश्च सकृच्छ्रुतत्वाद्युगपदेव सर्वान्यागान्स्मरणमशक्नोति न तु त्रीन् यागान् प्रथममभिधाय पश्चाद्दमां त्रीन्यागानभिधातुमु
त्सहत्वेन च युगपत्समुदायद्वयमेव तन्त्रेण कृतो नाभिधत्त इति वाच्यं समुदायद्वयस्य प्रागसिद्धेः सिद्धत्वेपि फलवाक्ये दर्शपूर्णमासवदन्तदभिप्रायं त्र
भवति यजिसामानाधिकरण्यविरोधात्। न चैवं सर्वेषां प्राधान्येपि तन्त्राभिधानशक्त्या एकसमुदायनिष्पत्तौ तदभिप्रायमेकवचनमेव स्यात् एजस्स

एवं तत्तन अद्विवचनात् उपपत्तिस्तु स्येनिवाप्यं नहीदं द्विवचनान्तं द्विवचनविभक्तिप्रतिरूपकाव्ययसत्त्वप्रातिपदिकरूपत्वात् एवं च दर्शपूर्णमासशब्दयोः का
लनिमित्तत्वाभावेन तद्संयुक्तानामपि फलसंबंधः तस्माद्विद्वाक्ये अपूर्वकर्मविधायके इति प्राप्ते सिद्धान्तयति प्रकरणान्तु पौर्णमास्यादिपाव
चनत्वात्तु शब्दान्तरत्वं पौर्णमासीमहरणमुपलक्षणं पौर्णमासीशब्दघटिते अमावास्याशब्दघटिते च विद्वद्वाक्ये प्रकरणं प्रकृतमेवाग्नेया
दिकर्मजातमनूद्यते ननु कर्मान्तरं विधीयते कुतः रूपाद्यवचनात् द्रव्यदेवते यागस्य रूपं तस्य देवतो देशक द्रव्यस्य गात्मकत्वात् तद्वचनस्य द्रव्य
देवतप्रापकस्य अभावात् न च हि सर्वेणैवाएतदिति वाक्ये शब्दोपबंधात् द्वौ गाज्यस्य सर्वयज्ञार्थतापायकं प्रजापतिर्देवेभ्यो यज्ञा व्या
दिशत् स आत्मन्नाज्यमधत्त तद्देवा अब्रुवन्नेष वाव यज्ञो यदाज्यमप्येव नो ऽस्त्विति सोऽब्रवीद्यजान आज्यभागावुपस्तृणानभिघारयानिति
स्माध्वर्जस्यज्यभागावुपस्तृणान्सभिघारयंतीति प्राजापत्यो पांशु याजाज्यभागोपस्तरणाभिधारणापर्विगमात्कार्यं विजस्य सर्वयज्ञार्थ
तासंभवे पि देवतानां लभ्यते न वा त्रं ध्रौवं यच्चतीवाक्य विनियुक्त मंत्रवर्णितो देवता लाभः शंक्यः तद्वाक्यं यो लिंगक्रमपाध्यामाज्यभागयोरस्य
वस्यपा प्राप्तमंत्राणां लिंगक्रमावाधेन व्यवस्थापात्र विधायकत्वेला घवेन संभवति विद्वद्वाक्य विहितकर्मणो र प्राप्तमंत्रविधायकत्वस्य
गौरवपराहतत्वात् लिंगक्रमवाधस्यवायुक्तत्वात् वा मर्धा हि कवो रको अग्निर्देवस्य आमा सोमदेवसात योश्च विद्वद्वाक्य विहिते एकस्मिन्कर्मणि
पुरोनुवाक्यात्वेन याज्यात्वेन च विनियोगानावकस्य तेन तद्धिकर्म अग्निदेवत्वं सोमदेवत्वं उभय देवत्वं वा स्यात् न त्वाग्निदेवसत्वे सोममंत्रस्या
मन्वयः सोमदेवसत्वे अग्निमंत्रस्यानन्वयः उभयदेवसत्वे उभमंत्रानन्वय इति सर्वथा लिंगवाधस्यात् एवं च यत्त्वस्योरपि अतो न मंत्रव
र्णितो देवतालाभसंभवः नन्वत्र पौर्णमास्याममावास्यायां कालेयावाज्यभागौ तत्र वार्त्रघ्नौ च धत्वन्तौ विनिहितं उत पौर्णमास्याममावा

स्यापां [illegible] कर्मत्वेपि प्राणाज्यभागावितिनाघः आज्यभागयोराग्नेया
दिवदुःसत्तोकाठसंयोगाभावेन तयोस्तत्कालीनत्वेनानुवादासंभवात् न द्वितीयः सममग्राथाम्पमितिवद्दर्तं पूर्वपक्षिणां प्रति पौर्णमासीक
मांगाज्यभागानुवादेन मंत्रव्यवस्थायावक्तुमशक्यत्वात् इति चेन्न आज्यभागयोः प्राधान्येपि पदव्याद्विवाक्येन पौर्णमास्यमावास्या
कालप्राप्तिसंभवेन कालमुखेन व्यवस्थायावक्तुं शक्यत्वात् न चैवं सति पौर्णमास्यां दर्शविकृतएतस्थानेवाग्नेयस्यास्तावद्धत्वलोपनस्या
तां एवममावास्यायां पौर्णमासविकृतस्थाने च धन्वसोमानावाग्नेयस्यानात्मितिचेन्न दृश्यापत्तेः बोधायनादिसूत्रे कालमुखेना
व्यवस्थापादर्शितत्वात् वस्तुतस्तु कर्ममुखेनैव व्यवस्था परंतु आज्यभागयोरपि प्रधानत्वात्पौर्णमासंगभूतत्वाज्यभागोपसनीवाग्नेयौ
र्व्यवस्थाविधिर्न संभवतीति वदंतं पूर्वपक्षिणां प्रति कालमुखेन व्यवस्था विधिसंभवाभूत्वरुभिमतत्वासिद्धिरिस्कजदृसंहोपः नच यागस्य
देवतां विनानुपपत्तेर्देवताकल्पना विश्वजितिस्वर्गवदिति वाच्यं यागानुपपत्त्यासा आक्षेपिकादिदेवतानिःसामान्यतोवगमेपि विधि
विनाद्दयमस्य देवतेसन्निधानोपयिकदेवताविशेषानवगमात् न चाथ पालाभेन विधानफलासंभवाद्गसाविद्धदृक्के आग्ने
याद्विप्रकृतपानुवादकेन त्रयपौर्णमासीवाक्येन पौर्णमासीकालसंयुक्तानां त्रयाणामनुवादः अमावास्यावाक्येन चामावा
स्याकालसंयुक्तानां त्रयाणामनुवादः। एकैकेन चानुवादेन एकावगमस्य प्रवेशादेकैकसमुदायापत्तिः। तदेकत्वात्पौर्णमासीम
मावास्यामिसेकवचनं तेन प्राकाल द्यपत्रसमुदायद्वयसिद्धत्वेन प्रसिद्धदर्शपूर्णमासपदं फलवाक्येपि जिंशक्नोति विशेषणं तु न विद्द्वा कायोर्य
ज्ञतिभ्यां त्रयाणां कालसंयुक्तानामनुवादस्त्वनुपपन्नं अविशेषात् न च पौर्णमासीममावास्यामित्युपपदं स्थानकालसंयुक्तमात्रपरत्वं यजस्योरितिवाच्यं
•

एकवचनांतपौर्णमास्यमावास्याशब्दयोरनेकयागपरयजिसामानाधिकरण्यासंभवेनतद्धेनव्यवस्थायाअसंभवात्तत्रचविद्वद्भ्यस्यनाम्नोरेवयजिप
रत्वंनतावंशक्यंभावेनयजिद्वयस्यसन्निहितसर्वयागान्वादस्वरूपतयातद्धेननाम्नोरपिसर्वप्रकृतयागनामत्वमेवस्यादितिचेन्नैवपएवविद्वान्पौर्णमा
स्यमावास्याशब्दितयोर्व्यवस्थितफलार्थवादश्रूयते।सचपौर्णमास्यमावास्याशब्दद्वयस्यव्यवस्थितार्थत्वएवघटतेनान्यथेतितदुभयसर्वत्वेपौर्ण
सर्वप्रकृतनामत्वंकिंतुकतिपयानामत्वमेव।तत्रापितत्तत्कालयुक्तकर्मनामत्वमेवन्याय्यमितितदनुसारेणतत्कालयोगिष्वेवविद्वद्भ्यांकस्यपजिप्र
वृत्तेरवश्यवाच्यत्वात्।एवंचसमुदायसिद्धेतत्रोपपदस्यप्रसिद्धत्वात्तदनुसारेणकांस्यभोजिन्यायेनकालसंयुक्तेष्वेवयजिप्रवृत्तेस्तेषामेवप्राधान्यं
नचसमुदायद्वयसिद्धवपिफलवाक्येदर्शपूर्णमासपदंकथंकथंनसर्वयजिसामानाधिकरण्यविरोधादितिवाच्यं।समुदायस्ययागत्वाभावेपिस
मुदायद्वारलक्षणयासमुदायिषुवृत्तिसंभवेनयजिसामानाधिकरण्योपपत्तेः।विद्वद्भ्यामाम्नायपयजिजिकृततंत्राभिधानलब्धसमुदायद्वय
स्यपौर्णमास्यमावास्यापदेनानुवादत्वेनतःपौर्णमास्यमावास्याद्यपसंज्ञाकरणेवतदनुकालसंयुक्तानामेवप्रत्यभिज्ञाबलेनापितेषामेवफ
लसंबंधः।नचविद्वद्भ्यांततःपौर्णमास्य[illegible]वास्याशब्दयोःसंज्ञात्वसिद्धवपिशब्दादेपूर्णमासशब्दयोस्तद्दसिध्याकथंपूर्णिमाकालयुक्ताना
मेवपरामर्शइतिवाच्यं।पौर्णमास्यमावास्याशब्दयोःदर्शपूर्णमासशब्दयोश्च पर्यायत्वात्।तथाचेतरथाचतुर्थेवक्ष्यामः।नचविद्वद्भ्यांपौर
र्णकर्मविधायकत्वाभावेपौर्णमास्यापौर्णमास्यायजेतेतिस्वार्थस्यादितिवाच्यं।परेणमपियागानामेकैकस्मिन्नेवापवर्गेप्रयोगप्राप्त्या
वेकस्यत्रिकस्यपौर्णमास्याप्रयोगः।अन्यस्यामावास्यायामितिसहप्रयोगार्थत्वात्।नचैवंसतियदृक्षवादिवाक्येनसर्वेषामिशायपशुबंधानां
सहप्रयोगस्यादितिवाच्यं।वैषम्यात्।फलवाक्येफलसंप्रतिविवक्षितसाहित्यसानामाग्नेयादीनांविनियोगात्कलापानांयुगपत्कालमतयावगते

मा०

श्रुते युगपदुत्पत्तिकीर्तिते पूर्णमासीकालो विहित इति तत्र प्रयाजानां सहप्रयोगो भवति तथामावास्यायामपि इष्टिपशुसोमानां तु पृथक्पृथक्स्वप्र-
ले विनियुक्तानां पृथगेव कर्तव्यतावगमेन अग्नेयोत्पत्तये हीरे वतैः कालस्य संबध्यते यथा चैतत्पाएकादशाहि तीयाघारिकालो न स्याम विहिताग्नेयो
रपूर्वकर्मविधायकत्वेवाधकांतरमाह। विशेषदर्शनाच्च एवं वाक्यसमेषु सत्सु प्रवृत्तिः स्यात्। न च शब्दकृतसमुच्चये। विहिताकोकर्मान्तरविधायकेनभ-
वितव्यं न चाले हि प्रयाजा हीनामपि प्राप्ता स्यात् न चैतद्युज्यते कुतः हि यस्मात्कारणात्प्रधानतया समेषु प्रयाजा ग्नेयादिषु सत्सु पूर्वं चाप्राकृतानां
प्रयाजानां विकृतिषु प्रवृत्तिर्न स्यात्। अग्नानामेवातिदेशस्य वक्तव्यमालतात् न चापि च कृतं विशेषदर्शनात्। क्वचिद्धि कृता प्रयाजा घृतवाद-
न विधेय विशेषस्य दर्शनात्। यथा घोषे प्रले वर्षे सकाम स्यात समाप्ते वृसो यं चरुर्न्निर्वपेत। प्रयाजे प्रयाजे कृष्णलं जुहोतीमा हि। आग्नेयादिविहिता चेन वि-
धायके। न नु पार्श्वाग्नेयादिवाक्यानां रूपलाभाभावेपि यागस्य पादिशां वाक्यस्य लाभसंभवाद्विहिता कर्म्मविधायकत्वमस्त्विति पूर्वपक्षसिद्धान्त्सवन्ति ष
ते। गुणसमुच्चतिसंयोगात् तु शब्देन न च एव पातानामाद्विहिताकोनविधायके इति न युज्यते पत्तो यदाग्नेयादिवाक्ये विहिताकाविहितयोगयोरग्न्यादि
वता संबन्धः पुरोडाशादिद्रव्यलक्षणस्य गुणस्य विधीयते। न तु यागाः कुतः। अतिसंयोगात् विहिता यागा विहितो हि यागो प्रत्यक्षमुपस्तिसंयुक्तो अनस्त-
रत्ववादेन गुणविधाने सति यदाग्नेयादिवाक्ये पुनः कर्म्मविधानार्थकत्व। यागविधायके पुनस्ते पुरुष्य देवतासंबन्धा घागोनुमातव्यः स्यात्। अतो रूप
लाभाद्विहिताकोविधायकानामाग्नेयादिवाक्यानां विशिष्टविधित्वसाध्यसंभवादिति वाच्यं गुणविधिरेव ते हि गुणस्य सिद्धरूपतया सतो विधयः
लाभावेन गुणविशिष्टभावनाया एव संबन्धः न केवलं गुणस्य। ततश्च यागं प्राप्य कर्मानुवादेन साक्षाद्देकगुणविधिः। किं तु नैक गुणविशिष्टभाव
नाविधिः। एवं च विशिष्टकर्मविधानविधिसकृदेव व्यापारः इति न विध्यावृत्तिरिति भावः। सिद्धान्तं प्रस्तावयति चोदना वा गुणानां युगपच्छास्त्रत्वा-

न्दिते हितदर्थत्वात्तस्य तस्योपदिश्येत। वाशब्द एवार्थे यद्यप्येवं यद्विवाक्यान्निर्गुणविशिष्टयागचोदनाएवं न तु विद्धवाक्यविहितयागानुवादेन गुणमात्र
विधयः कुतः युगपच्छास्त्रात् शास्त्रशासनं विधानं। युगपदनेकगुणानां विधानप्रसंगात्। न स्यच वाक्यभेदप्रसंगेनायुक्तत्वात् न च विशिष्ट
भावनाविधानान्न वाक्यभेद इति सत्यमाह। चोदिते हीति चोदिते प्राप्ते कर्मणि प्रत्ययस्य तत्र गुणविधानार्थत्वात् तस्य तस्य गुणस्य विधानार्थः
प्रत्ययः पुनः पुनरुच्चार्यते। अयमाशयः प्रवर्तनारूपशब्दभावनात्मकविधेः प्रवृत्तिरूपार्थभावनागर्भतया तावद्गुणविशिष्टभावनागर्भ
तया प्रथमं प्रतीयमानोऽपि विधिर्भावनांशस्य विद्धवाक्यत एव प्राप्ततया तत्स्वरूपलाभावेन विशेषणीभूतगुणपरस्सन् गुणांशे पर्यवस्य
तिपत्रविधेः पर्यवसानं तस्यैव विधेयत्वात् भावनांशस्य विध्यनन्वितत्वान्न तथाप्रतीयमानतमात्रेणाविधेयत्वेऽप्यस्यापि विधेयत्वापातात् न तत्रा
नेकगुणविधिस्वीकारे सर्वत्र विधेस्तात्पर्यात् सर्वत्र पर्यवसानं वाच्यं। न च सकृच्छ्रुतस्य विधेरनेकत्र पर्यवसानं संभवतीति विध्यावृत्तिरव
र्जनीया। न चैवं सति सोमेन यजेतेति गुणविशिष्टविधिर्न स्यात् तत्रापि विशेषणविधिपर्यवसानार्थमावृत्तिप्रसंगादिति वाच्यं। वैषम्यात्।
विशिष्टविधिस्थले तु नैवमाक्षेपाद्विशेषणलाभः भावनारूपस्य कर्मरूपस्य वा विशेष्यविशेष्यस्यान्यतः प्राप्ततया विधेर्विशिष्टपरत्वाभा
वात् केवलगुणपरत्वमेव वाच्यं। तत्र च एकस्य गुणस्येतरविशिष्टस्य विधिर्न संभवति गुणानां च परार्थत्वादिति न्यायेन नैषापरस्परवैशि
ष्ट्याभावात्। तेन न श्रेयकेन विहितेन इतरस्यानाक्षेपात्। प्रतिगुणं पृथगेव विधेस्तात्पर्यतः पर्यवसानं वाच्यमिति तत्र विध्यावृत्तिरनिवार्या। न
चैवं सति पशुना यजेतेत्यादावपि प्राप्तकर्मानुवादेन जातिलिंगसंख्याकारकाणां विधानं न स्यादिति वाच्यं। वैषम्यात्। समनेन हि क्रियानां
धान्याजवत्प्रकृतिप्रत्ययाभ्यां जातिलिंगसंख्याविशेषितं कारकमेकमुपस्थितं तदुपस्थितो व न विधेर्यापारः। कारकप्राधान्यं हि पश्चैक वाधि

करणेऽवरुध्यतेऽनवरुद्धत्वात्तैकोऽभ्यामेव ज्ञातसादेराग्नेयपलस्य लोके सिद्धत्वात् । एवमभ्युदिते शैये सौदिष्टत्वान्न विशेषवेशिपि विशेषाय अत्र ते चरुः मिसादि-
भिन्नपदोपादानस्यैकत्वेऽपि विशेषवेशिपि विशेषयति सामानाधिकरण्येन शिपिविष्ट इति भिन्नवचनत्वेऽपि योगानुगृहीतेन शिपिविष्टत्वेन शिपिविष्टो विष्णुः कियास-
वं धात्वप्रयोगे चोपस्थितः प्रतीते अघशिपिविष्टानामार्थ्यं सामीचुनानि विहितानि सादित्यं मन्त्रतो पलशोभं सा यायापुष्टिसन्दिग्धः शिपिविष्ट-यत्नो
वेविष्णुः पशव शिपिविष्ट सा घर्यवादतन्त्र प्रसिद्धं च विष्णोः शिपिविष्टत्वं न तत्र विधेः व्यापारः । अत एव तत्तद्विशिष्टस्य विष्णोर्विधानं युज्यते । प्रकृते
तु आग्नेयोऽष्टाकपाल इत्यादि सामानाधिकरण्येन शब्दतो विशिष्टार्थप्रतिपादनसंभवेऽपि विनैव विधिना वस्तुतः प्रसिद्धत्वं यत्ताभावान्न वि-
शिष्टविधिसंभवः । न ह्याग्नेयत्वाष्टाकपालत्वादीनां वैशिष्ट्यं प्रमाणान्तरेणास्ति । अनेन तु विधानेन भवेदाकर्भेदः । अत आग्नेयादिवाक्यानि न प्रा-
प्तकर्मोद्देशेन गुणविधायकानि किंत्वनेकगुणविशिष्टयागान्तरविधायकत्वमेवैषामभ्युपेयं । ततश्च पदाग्नेयादिवाक्यतोऽपि रूपलाभाभावादिदृष्ट-
कोऽपि न विधायकं इतोऽप्याग्नेयादिवाक्यानां गुणविधित्वमित्याह । अपदेश तद्धनाध्याहितविराणानि हवींषि संक्षियन्ते । आग्नेयः प्रथमं ऐन्द्राग्नं तत्र
इति पौर्वापर्यं च पदे दृष्टोऽप्याग्नेयादिवाक्यानां विशिष्टयागविधायकत्वं प्राथम्यवाक्यभेदेन साधयति विहितस्य विहितकर्मानुवादेन गुणवि-
धित्वे तु पौर्णमासीयागे आग्नेयपुरोडाशाग्नीषोमीयोपांशुयाजाग्नीषोमीयपुरोडाशानां विकल्पः स्यात् । अमावास्यायागेऽपि आग्नेयः पुरोडा-
शः । सोमयाजिन ऐन्द्रं पयः । असोमयाजिन ऐन्द्राग्नः पुरोडाशः इत्येषां विकल्पः स्यात् । न चासत्सु तादृक्पौर्वापर्यानुवादेनोपपद्यते । तदुपपत्तः
द्धये विधायकलिङ्गमाह । लिङ्गदर्शनाच्च । चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायामिति लिङ्गवाक्यशेषः । पञ्च प्रयाजा द्वावा-
ज्यभागौ स्विष्टकृत् त्रयोऽनुयाजा इत्येकादशाहुतयः । आग्नेयोपांशुयाजाग्नीषोमीया आहुतयस्तिस्रः इति चतुर्दश पौर्णमास्याम् । अमावास्यायां

३२

यांतुताएकादशाहुतयः आग्नेयसान्नाय्याहुती द्वादधिपयसोरेकदेवताकत्वेनन द्याहुतेरेकत्वात् इति त्रयोदशोतिनदर्थः तदेतल्लिंगदर्शनमाग्नेयादिभ्यो
विद्वद्वाक्ययोः कर्मान्तरपक्षेऽधिकसंख्याकत्वापातात् तेषां तत्रा विधित्वेऽन्यूनसंख्याकत्वापातात् इदं समंजसं स्यात् तस्माद्विद्वद्वाक्ये प्रकृतयागसमु
दायानुवादकं इति पौर्णमास्यधिकरणे । दर्शपूर्णमासयोः प्रयुयते जामिवाएतद्यज्ञस्य क्रियते यदन्वंचौ अयमत्र हितौ पुरोडाशसाध्यो आग्नेयाग्नी
षोमीययागौ तत्क्रियते तत्र तज्जामित्वसमाधानाय एकरूपत्वात् अतः तौ याग्यावान्तराले उपांशुयाजमन्तरा यजतीति विष्ण्वादिसंयुक्ता
नां यागानां समुदायानुवादः उत पूर्वकर्मणो विधिरिति संशयः तत्र पूर्वपक्षयति पौर्णमासीवदुपांशुयाजः स्यात् पौर्णमासीशब्दयुक्तविद्व
द्वाक्यवदुपांशुयाजशब्दयुक्तमुपांशुयाजमन्तरा यजतीति वाक्यमपि प्रकृतयागानुवादकं स्यात् । न त्वपूर्वकर्मविधायकं रूपलाभात् यद्य
पि द्रव्यं वाज्यं लभ्यते द्रव्यं देवता तु न लभ्यते नच रदविष्णुरुपांशुयष्टव्यः प्रजापतिरुपांशुयष्टव्योऽग्नीषोमायोऽघवानाघं द्विवो मातरिश्वेति वैकल्प
व प्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानां पुरोडाशयागीययाज्यानुवाक्यायुगलयोरन्तरे पाठात् तत एव गाप्ति देवतालाभ इति वाच्यं । एते
षां त्रयाणामपि युगलानां लिंगक्रमाभ्यां विष्ण्वादिवाक्यविहितयागत्रय एव समावेशासंभवे सति अन्तरालवाक्यविहितकर्मण्यनवद्धदेवते सा
मर्थ्यापरिज्ञानेन सपावेशासंभवात् । न च विष्ण्वादिवाक्यजातमर्थवाद इति शंक्यम् । विध्यपर्यवसानेऽपि प्रसाद्य श्रवणात् न विष्ण्वादिदेवताकत्वयागवि
धायकत्वस्यैवयुक्तत्वात् । संप्रदानस्य च कर्मसंतावत्वे वेति संप्रदानस्यापि कर्मत्वेन विष्णुं यजतीसाहो देवताया हितीयावत्कर्मणि विहितएव
नखस्याप्युपपत्तेः किंच उपक्रमोपन्यस्तजामित्वदोषाभावप्रतिपादनपरस्य अजामिसापेक्षस्य विष्ण्वादिवाक्येष्वेव श्रवणात् नत्वेव विधिशक्तिर
न्यतरत्र इति प्रसेकमेव विधिर्वाच्यः अन्यथा निश्चयजामिलोके एनर्थक्यात् । नतजामिवाएतदिति दोषस्यासङ्कीर्तनेकवाक्यत्वमेवन्याय्य

मितिवाच्यं। सकृच्छृतस्यापि तस्य त्रिश्रपितेष्वनुषंगेणान्तछेषत्वोपपत्तेः अतो दध्यप्रसादाभावे तमामोपदेशाद्यांतरालवाक्यस्य विधायकत्वं न चांतरा
लकालविधायकत्वमिति शंक्यं। अजामित्वानुकीर्तनबलादेवांतरालकालएव। चित्वादिप्राग्विधेः पर्यवसानात्। तथा च कृत्स्नमेवांतराल
वाक्यं प्रकृतविष्वादियागवाक्यानुवादकं। ततश्च तावद्भूतामग्नीषोमावाज्यस्योपांशुपौर्णमास्यां यजन्तीति कालवाक्यस्थेन य
जिना सर्वेषां ग्रहणं सिध्यति अन्यथा नाविसग्नीषोमोपप्रतिपादकोपपद्यते हि न्याय अग्नीषोमीयपयागमात्रस्य स्यात्। सति तु समुदा
यागवादे तद्धत्वात्समुदायीकृतानां त्रयाणामपि यागानामनुवादः। अग्नीषोमप्रतिपादकत्वेऽशब्दग्रहणं च त्रयाणामपि यागा
नुवादकं कुतः प्रकृतत्वात्। विष्वादिवाक्यानामार्थवादत्वेनाविधायकत्वे यातनो विष्वादियागानामनुपपत्तिरीत्वात्। तथाहि। उप
क्रमेप्रोडाशयागयोरव्यवहितत्वनिमित्तकजामित्वदोषकीर्तनाद्नंतरालयुक्तयोः किंचित्कर्म विधेयमिति निश्चीयते ततश्चोत
दनुसारेणांतरालवाक्यस्यैवांतरालयुक्तकर्मविधायकत्वं स्वीकार्यं। न तु स्वरसतो विधिसमर्थानामपि विष्वादिवाक्यानामन्य अं
तरालयोगाभावात्। नांतराले अविहितानामजामित्वेन प्रशंसा युज्यते। न च नैष्प्रत्येकजामित्वप्रशंसावगमात् प्रत्येकमेव विधि
युक्तमिति वाच्यं। उपक्रमस्थाव्यवधानप्रयुक्तजामितादोषकीर्तनेनाजामित्वप्रशंसाया अप्युपक्रमदशायामेवांतरालयुक्तविधिविषयकतयावनि
तत्वेन विष्वादिषु प्रशंसावगमस्यैवाभावात्। न च जामित्वकीर्तनवाक्यादेव विष्वादिवाक्येष्वन्तराल्यकालत्वाभानेऽपि विधिसंगच्छत इति वाच्यं। विष्वा
दिवाक्येष्वंतरालत्वलाभस्यार्थिकः। अंतरालवाक्येन तु तल्लाभः शाब्दः। न तूपक्रमस्थजामिताहोषादेवगतमंतरालयुक्तकर्म भिसाकांक्षामंतरालशब्दघटि
तवाक्ये पूरयति। सति आर्थिकांतरालप्राप्त्यनुग्रहीतविष्वादिवाक्यानां तस्य रक्तेनायुज्यते तस्मादुपांशुयाजमंतरा यजतीत्युपांशुगुणकोयागो

३२

33

तरणलकाले विधीयते विद्वाद्विवाक्यं च मंत्रवर्णाप्राप्तविद्वादिदेवतानुवादेनार्थवादः ॥ एवं च जामित्वोपक्रमादुज्जामित्वोपसंहाराच्चावगतमेकवाक्य
त्वमप्यनुगृहीतं भवति जामिवा तत्र स्येसस्पान्तरगोप्यनाश्रितो भवति पुनः पुनर्जामित्वसंकीर्तनं तु प्रशंसातिरस्कार्यमिति सिद्धं मंतरवाक्य
स्य विधायकत्वं नन्वंतरवाक्ये उपांशुयाजशब्देस्य नगुणविधित्ववाक्यभेदप्रसंगात् नापि नामत्वं तत्प्रख्यादिभावादित्यत आह। गुणोपबंधा
त् उपांशुयाजशब्देनोपांशुत्वगुणस्यैवोपबंधात् विधानात्। विशिष्टविधाने च न वाक्यभेद इति पार्थसारथिमतानुसारिणी व्याख्या। उपां
शुत्वगुणको यागो न तृणोपलक्षितकाले विधीयत इति शास्त्रदीपिकायामभिधानात्। अभ्युपेत्य उपांशुपौर्णमास्यां यजन्तीति कालसंबंध
परे वाक्ये उपांशुत्वगुणस्योपबंधात् अस्मिन्नुपांशुयाजनामधेयमिति व्याख्यातानन्तरवाक्यस्य विद्वादियागसमुदायानुवादकत्वा
भावे ताच्चवृत्तामिति कालपरे वाक्ये नाविलग्नीषोमप्रतिपादकोपपादमग्नीषोमीयमात्रस्य ग्रहणं स्यात् न तु वैष्णवप्राजापत्ययोः ततश्च पू
र्ववाक्येन वाक्येन तयोर्ग्रहणात् प्राप्यमंत्रस्यादित्यत आह। प्रायेव वचनात् प्रधानभूताग्नेयाग्नीषोमीययागीवयाज्यानुवाक्यायुगलयोर्मध्ये
वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानामाम्नानात्त्रिविधस्याप्युपांशुयाजस्य प्राधान्यमवगम्यते न तु लाद्देवतावद्भूतामिति का
लपरे वाक्ये नाविसस्योपलक्षणार्थत्वं सिद्धमिति भाव प्रयोजनं पूर्वपक्षे वैष्णवादियागाभ्यासयोपि समुच्चयेनानुष्ठेयाः सिद्धान्ते तु एक एव वि
कल्पेन विद्वादिदेवताकोपाग इति दिक् ॥ इत्युपांशुयागाधिकरणं ॥ अग्निहोत्रं जुहोति दध्ना जुहोति पयसा जुहोति यवाग्वा जुहोतीत्या
दिश्रुतं ॥ आघारमाघारयति ऊर्ध्वमाघारयति ऋजुमाघारयति संततमाघारयतीत्यादि च तत्र अग्निहोत्रं जुहोतीति दध्नादिवाक्यप्राप्त
समुदायानुवादः आघारमाघारयतीति ऊर्ध्वमाघारयतीत्यादिवाक्यप्राप्तानुवादः उताग्निहोत्रं जुहोतीत्यपूर्वकर्मविधिः दध्नादि वाक्या

एमः
३२

न्नि च तत्रैव गुणविधयः तथा आघारमाघारयतीत्याघारविधिः ऊर्ध्वादिवाक्यानि तत्रैव गुणविधय इति संशये पूर्वपक्षयति । आघाराग्निहोत्रमरूपत्वात् । आघा-
राग्निहोत्रयोर्मध्येऽग्निहोत्रवाक्यं च न विधायकं कुतः अरूपत्वात् न विधत्ते रूपं द्रव्यदेवतामन्त्रोर्ध्वतादिरूपं न कोऽपि गुणः यस्य न रूपं तस्याभावत्वं तस्मात्
मग्निहोत्रं जुहोतीति हि होमसामान्यं न विधानयोग्यं सामान्यस्यानुष्ठानानर्हत्वात् । नापि विशेषः तस्यापि पयसादिसन्निहितत्वेन विधातुमशक्यत्वा-
त् । न चाग्निहोत्रसंज्ञकमिदं कर्मेत्येवं संज्ञयैव विशेषावगमः संभवतीत्यत आह । संज्ञोपबंधात् । अपि न विशेषावगम इति शेषः कर्मविशेषापरिज्ञानेन कस्य-
प संज्ञेत्यपरिज्ञानात् संज्ञयापि न विशेषावगमसंभवः । उद्भिदादिस्थले तु चोदकनामरूपलाभात् संभवति विशेषावगमः । ननु दध्यादिवाक्येन गुणविधानाद्वि-
शेषावगमः संभवतीत्यत आह । अप्रकृतत्वाच्च । प्रकृते हि कर्मणि दध्यादिगुणविधिरिति चेत्कथं न च न संभवति कस्यचित्कर्मणः अप्रकृतत्वात् न चा-
ग्निहोत्रवाक्यतः कर्म प्रकृतमिति शंक्यं तथा सति दध्यादिवाक्ये गुणविधौ सति ततो विशेषावगमादग्निहोत्रवाक्यस्य कर्मविधायकत्वं तस्मिंश्च सति
दध्यादिवाक्ये गुणविधानमित्यन्योन्याश्रयात् । चशब्देनोक्तयुक्त्यन्तरसमुच्चयार्थः तथा अग्निहोत्रवाक्यस्य विधायकत्वेऽपि तत्र दध्यादिवाक्येन गुणवि-
धानं न संभवति प्रवर्तनात्मकविधिना पुरुषव्यापारादन्यस्य विधातुमशक्यत्वात् । तथा च दध्युद्देशको व्यापारो विधेयः स च होमात्मकोऽग्निहोत्रवाक्येनै-
व प्राप्त इति तस्य पुनर्विधानमनर्थकं न चोत्पन्नस्यापि कर्मणो यथा फलादौ पुनर्विधानं तद्वदिहाग्निहोत्रवाक्योत्पन्नस्य कर्मणो गुणविशिष्टतया पुन-
र्विधिरस्त्विति वाच्यं विधिर्हि चतुर्धा फलनिमित्तयोः कर्मविधिरधिकारविधिः देशकालयोः कर्मविधिः प्रयोगविधिः संस्कारे शेषतया कर्मविधिः — नियोग-
विधिरेतत्त्रितयभिन्नो विधिरस्तीति विधिरिति तन्न दध्यादिवाक्ये गुणविशिष्टतया विधिस्वीकारे अधिकारादिविधित्रयानन्तर्भावेन परिशेषादुत्प-
त्तिविधिरेव वाच्यः उत्पत्तिविधिभेदे च कर्मभेद आवश्यकः एवं चेहापि कर्मभेदावश्यंभावान्नाग्निहोत्रवाक्यविहितकर्मणो गुणविशिष्टतया पुन-

३४

34

विधिसंभवति अतो दध्यादेरन्यतो प्राप्तत्वेन मंत्रवर्णप्राप्तविध्याघातवादेन तद्वाक्यानामिव स्तावकत्वासंभवेन दध्यादिवाक्यानां दध्यादिविशेषकर्मविधित्वे
सति तद्विहितकर्मसमुदायानुवादकमग्निहोत्रवाक्यं। तत्र यद्यपि दध्यादिवाक्येषु देवता न श्रूयते यद्यप्येतेष्वादिवाक्येषु द्रव्यं न श्रूयते मंत्रविधिस्थले
मान्त्रवर्णिकदेवतालाभसंभवेपि द्रव्यलभ्यते। एतेषां च सर्वेषां वाक्यानां तत्तद्गुणविशिष्टकर्मान्तरविधायकत्वानघटापि कर्मत्वे द्रव्यदेवताभ-
पलाभासंभवः तथापि दध्यादिवाक्ये देवतोद्देशरहितं सागप्रक्षेपमात्रं विधीयते तदन्यस्येतेष्वादिवाक्येषु अग्न्यादेर्द्रव्यासंबंधेऽसति मुख्यदेवतात्वा-
संभवात् अग्न्यादीनामुद्देशमात्रं चतुर्थ्यन्तशब्देन निर्देशलक्षणं विधीयते। मंत्रविधिस्थलेपि मंत्रस्योच्चारणमेव विधीयते। एतेषु च वाक्येषु जुहोति
स्तत्तद्विधेयसागप्रक्षेपादिषु लाक्षणिकः। तेषां च प्रक्षेपादीनां सर्वेषामग्निहोत्रं जुहोतीत्ययमनुवादः। तत्प्रयोजनमग्निहोत्रं जुहुयात्स्वर्गकाम
इति फलवाक्ये सर्वेषां ग्रहणं अग्निहोत्रमित्येकत्वनिर्देशस्य समुदायीकरणं विनानुपपत्तेः किंच समुदायानुवादाभावे पदस्येतेष्वादिवाक्यवि-
हितानां सर्वधकर्मणामेवोपपदत्वशासनवाक्ये ग्रहणं स्यात् तद्विनुतनवादेन तस्मात्प्रकृतानां सर्वेषामग्निहोत्रशब्देनामधेयमिति स्वर्ग-
मात्सर्वेषां फलसंबंधसिद्धिः। एवमाघारवाक्यमप्यूर्ध्ववाद्याक्यविहितानामूर्ध्वत्वार्जवसांतत्यमंत्रादिविशिष्टकर्मणां समुदायानुवादः।
ततश्चानुगृहीतं वा एतद्यज्ञस्याघारमाघारयतीति प्रयाजार्थाज्यरूपेसंस्कार्ये आघारविनियोजकवाक्ये सर्वेषां ग्रहणं सिध्यति आघारमि-
त्येकत्वनिर्देशस्य समुदायीकरणं विनानुपपत्तेः तस्मादग्निहोत्रवाक्यमाघारवाक्यं च न विधायकमिति पूर्वः पक्षः। सिद्धांतयति। चोदनावा
शब्दार्थस्य प्रयोगभूतत्वात्तत्संनिधेर्गुणार्थेन पुनः श्रुतिः। वाशब्दः एवार्थे अग्निहोत्रवाक्यमाघारवाक्यं च चोदना अपूर्वकर्मणो विधा-
यकमेव न तु प्रकृतकर्मणामनुवादः कुतः आघारयति शब्दार्थस्य जुहोति शब्दार्थस्य च प्रयोगं अनुष्ठानं प्राप्तत्वात्। आघारहोमयोरनुम-

एम:

३४

प्राप्तत्वेनावश्यविधेयत्वादित्यर्थः। ननूर्ध्वादिवाक्ये दध्यादिवाक्येष्वविशिष्टकर्मविधायके प्राप्तत्वादनन्यप्राप्तत्वं तयोरसिद्धमित्यत आह गुणार्थे
न पुनरश्रुतिरितिलिङ्गमिति पर्यायप्रयोगेष्ववासां प्रायदर्शनमिति तृतीयाचतुर्थ्यर्थे ऊर्ध्वत्वादिदध्यादिगुणविधानप्रयोजनाय च आघारयति
जुहोतीति पुनः श्रुतिः अन्यवादइत्यर्थः। ननु सन्निहितं धात्वर्थं परित्यज्य प्रसज्य कथं गुणं विदध्यादित्यत आह तत्सन्निधेरिति तस्य गुणस्य वि
शेष्यधात्वर्थानुप्रवेशेन प्रसज्य सन्निधानादित्यर्थः। अयंभावः सोमेन यजेतेत्यादिषु वाक्यांतरेणाप्राप्तेरगत्या गौरवमप्यंगीकृत्य विशिष्टवि
धानमभ्युपगम्यते। इहत्वाघारमग्निहोत्रवाक्याभ्यां प्राप्तकर्मानुवादेन गुणमात्रविधानं संभवति तेन विशिष्टविधित्वमूर्ध्वादिदध्यादिवाक्याना
माप्यमाश्रयितुं। ननु आघारमग्निहोत्रवाक्ययोः प्राप्तार्थत्वाद्विधिपरत्वे निश्चिते तत उक्तरीत्या एवं सामान्यस्यायोग्यत्वाल्लक्षितो विशेष एव वि
धीयतां स्वविशेषोयमसाविति विशिष्यानवगतोप्यन्यत्राविहितोयं कश्चिद्धोमविशेषः स तावन्मात्रेणावगन्तुमिति कृत्वा विधीयते। एवं च
विशिष्यज्ञानस्यानपेक्षितत्वान्न पूर्वपक्षोक्तान्योन्याश्रयावकाशः। तावन्मात्रावगमेनापि संतोषपर्यवसानोपपत्तेश्च संज्ञादुर्घटत्वं च। न तत्रास्या
पि विशेषस्वरूपालाभादपर्यवसानमिति वाच्यं। दध्यादिवाक्ये न तल्लब्धाभावात्। न चाव्यापारत्वात् केवलस्य दध्यादिगुणस्य विधानमसंभव
तीति वाच्यं। होमादिव्यापारविशिष्टस्य तस्य विधातुं शक्यत्वात्। न चैवं सति गुणस्य साक्षाद्विधिविषयत्वाभावेन गुणविशिष्टकर्मविषयत
या विधेः प्रतीयमानतया कर्मोत्पत्तिपरत्वापत्तौ कर्मभेदः स्यादिति वाच्यं। कर्मणः प्राप्तत्वेन तत्स्वरूपज्ञाने विधेर्व्यापारात्। अप्राप्तगुणांशे ए
व तात्पर्यात्। विधितात्पर्यविषय एव हि विधेयः। ननु विधिसंबन्धितया प्रतीयमानमात्रं न तत्त्वं दध्यादिवाक्यस्य कर्मोत्पत्तिविधित्वाभावे
[illegible]ग्निहोत्रवाक्योक्तकर्मणो दध्यादिवाक्ये दध्यादिगुणविशिष्टतया प्रतीयमानत्वेपि न भेदप्रसक्तिः एवमाघारवाक्येपि न तथाचाघार

वाक्यमग्निहोत्रवाक्यं च प्रकृतकर्मलाभाभावाद्रूपलाभासद्भावाच्च विधेयत्वेन समुदायानुवादः प्रयोजनं पूर्वपक्षे दध्यादिवाक्यविधेयानां कर्म
णां समुच्चयेनानुष्ठानं। सिद्धान्ते त्वेकस्मिन्नेव कर्मणि दध्यादीनां वैकल्पिकत्वान्न समुच्चयस्तस्माद्द्वितीयाघारवाक्ये तु ऊर्ध्वत्वादिगुणयुक्तस्य
कर्मशास्त्रवद्गुणकस्य कर्मणः पुनरनुष्ठानं पूर्वपक्षे सिद्धान्ते तु कर्मभेदाभावाद्गुणानुरोधेन प्रधानावृत्त्यसंयोगाद्गुणलोपप्रायश्चित्तमित्या
दिहसाघारएग्निहोत्राधिकरणं। अग्नीषोमीयं पशुमालभेतालभन्तेः किं हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इत्यादिविहिता
नां कर्मणां समुदायस्यानुवादकः उतापूर्वकर्मविधायक इति संशयः तथा सोमेन यजेतेति यजति। ऐन्द्रवायवं गृह्णाति मैत्रावरुणं
गृह्णातीत्यादिविहितकर्मणां समुदायस्यानुवादकः। उतापूर्वकर्मविध्यवश्यंभावेनालभति यजसोस्त्वेवमेवयुक्तं। ऐन्द्रवायव
मित्यादिद्वितीययागस्यपानं हि साध्यसमुत्साधनतया वा संस्कार्यतया वा नाद्यः देवतानन्द्धितान्तेन देवतासंबंधिद्रव्यवाचिना ऐन्द्रवाय
वादिशब्देन प्रतीयमानस्य द्रव्यदेवतासंबंधस्य योगेकघटनापस्सग्रहणेन घटयितुमशक्यतया ऐन्द्रवायवादिद्रव्यं ग्रहणेनोत्साद
येदित्यर्थस्यायुक्तत्वात्। न द्वितीयः। अवहननादिसंस्कार्याणां व्रीह्यादीनां व्रीहिभिर्यजेतेत्यादिशास्त्रान्तरेण सिद्धिवदैन्द्रवायवत्वा
दिविशिष्टद्रव्यस्यासिद्धत्वेन तदुद्दिश्य ग्रहणसंस्कारविधानायोगात्सोमवाक्यस्य यागविधायकत्वे सति विशिष्टसोमरूपस्तत्ताद्र
व्यस्य सग्रहणेन संस्कारानुपपत्तेश्च। धारादिवाक्यतो ग्रहणस्य रसविषयत्वावगमात्। एतेन ऐन्द्रवायवग्रहणेन भावयेदित्य
दृष्टार्थविधित्वमपि प्रसक्तं देवतासंबंधानुपपत्त्या आरादुपकारकस्यापि ग्रहणस्यासिद्ध्यनुपपत्तेः। तस्मादैन्द्रवायवादिवा
क्येषु द्रव्यदेवताभ्यां ग्रहणेन च विशिष्टा यागा विधीयन्ते। न चैन्द्रवायवादिशब्दस्य तस्येदमिति संबंधसामान्यविहिततद्धितान्तत

तमेवास्तुतयावदैंद्रवायवादिप्रकाशकमंत्रेणाक्रियमाणोग्रहणोकरणमंत्रद्वारेणैंद्रवायुदैवत्यस्यग्रहस्याद्वारेणैंद्र्येवतद्दैवत्यस्योपप
न्नेग्रहस्यामात्रविधिसंभवइतिवाच्यं।सामान्यस्यानुष्ठानौपयिकत्वेनानुष्ठानोपयिकसंबंधविशेषाभिधायिदेवतातद्धितांतत्वेसंभवतिवाच्यं।सा
मान्यस्यानुष्ठानौपयिकत्वेनानुष्ठानौपयिकसंबंधविशेषाभिधायिदेवतातद्धितांतत्वेसंभवतितस्येदमितिसंबंधसामान्याभिधायितद्धितांतत्वा
श्रयणस्यायुक्तत्वात्।तस्यदेवतेत्यधिकारेद्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छेतिविशिष्यविहितदेवतातद्धि
तप्रसक्तेषांतेनमरुत्वतीयगृह्णातीतिवाक्यगतमरुत्वतीयशब्देनसहचरितानामैंद्रवायवादियागानांसोमवाक्येयजिस्समुदायानुवादकः।सोम
शब्दोपिनविधिः।सहिगृह्णातिनाअनियमेनप्राप्तस्ययागस्यद्रव्यस्यनियमविधिपरोवाप्रकृतिद्रव्यविधिपरोवास्यात्।नाद्यः।तस्यैंद्रवायवादिवा
क्यविहितयागेषुसोमलताद्रव्यस्यहविष्ट्वप्रसंगात्।नचैषापतिशयांक्याघ्राणव्याघारयोगृह्णातीतिगुणवाक्यपर्यालोचनयाधारासमर्थजला-
दिरूपद्रव्यद्रव्यविशेषणस्यनिश्चितत्वेनसोमलतानालक्षणद्रव्यविधेरसंभवात्।नचसोमस्यरसीभावेनाभिधारणवाक्यस्योपपत्तेर्नसतसिद्धजला
दिद्रव्यस्यप्राप्तिरितिवाच्यं।रसीभावेसतितस्यनिष्पीडितत्वात्रूपस्यभंगापत्त्यातस्यहविष्ट्वलाभात्।अस्तुनहिरसभक्षहविःप्रकृतित्वेनसोमद्रव्यस्यवि
धिः।व्रीहिभिर्यजेतेतिपुरोडाशप्रकृतिभूतव्रीहिद्रव्यवदितिद्वितीयपक्षः।नचेहविकृतद्रव्यस्यानुपपन्नत्वात्।कथंप्रकृतिद्रव्यविधिरितिशंकां।व्रीहि
वाक्यवदेवोपपन्नेः।नहिपुरोडाशानुवादेनव्रीहिविधिः।व्रीहिभिरितिकारककविभक्तेर्द्रव्यसंबंधायोगात्।पुरोडाशस्यानुपपन्नत्वाच्च।किंतुयागंप्रति
करणत्वेनविहिताव्रीहयःपुरोडाशावरुद्धयागेसाक्षात्करणत्वासंभवात्प्रकृतित्वेनकरणीभवंतीतिप्रकृतिविधिस्संपद्यते।एवमत्रापियागं
प्रतिकरणत्वेनविहितसोमोधारणस्समर्थद्रव्यद्रव्यावरुद्धयागेनप्रकृतिभवतीसर्वाप्रकृतिविधिस्संपद्यते।नचप्रकृतिनिरपेक्षजलसाधार-

ल्लात्। एतत्समर्थं द्रव्यत्वस्य पुरोडाशादेर्लक्ष्यत्वापादिह कथमर्थाद्यपि प्रकृतिविधिसंभव इति वाच्यं। यथा एतत्समर्थं द्रव्यं हि किं चेद्यपि यद्दि सर्वथा प्रकृति
संबंधानर्हमेव स्यात् तथापरं प्रकृतिविधिर्न संभवेत्। अर्ह इति चेत् तथा एतत्समर्थद्रव्यं किं चिद्दिह प्रकृतिद्रव्येण संबंधे अत्र सोमशब्देन प्रकृतिद्र
व्यविधिस्संगच्छत इति चेन्न सोममभिषुणोतीत्यादिवाक्यप्रामाण्यात् अभिषुतस्य सोमस्य धारां स्रावयतीत्यादिवाक्ये रेवं धारा द्रव्यस्य सोम
लताप्रकृतिकत्वप्रसक्तिस्तात्तत्त्वेन प्रकृतिविधेरानर्थक्यात्। अतस्सोमशब्दोपि सोमं क्रीणाति सोममभिषुणोतीत्यादिवाक्यप्रामाण्यादनु
वादी भवन्नत्रत्यस्य यागेन नामधेयं भवतीति नच ज्योतिष्टोमनाम्नास्तस्याव्यायामार्थानर्थक्यशंक्यं। न्यायप्राप्तत्वेन नामान्तरस्यापरिहार्यत्वा
त्। स एष यज्ञः पंचविधोग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुस्सोमः स्वर्गकामस्सोमेन यजेतेति संकल्पयत्तत्त्वसादिव्यवहारस्य ज्योति
ष्टोमनाम्नान्यथासिद्ध्यभावेनानर्थक्याभावाच्च। तथा च कृत्स्नं सोमवाक्यमनुवादः। तत्र सोमशब्दस्य प्रयोजनमुक्तमेव। एवं द्वापवादिवा
क्यविहितानां यागानां समुदायानुवादकयजेस्तु प्रयोजनं ज्योतिष्टोमेन स्वर्गकामो यजेतेति फलवाक्ये सर्वं यागसमुदायस्य ग्रहणात् समुच्चित्य सा
नुष्ठानं। सोमवाक्यस्य यागविधायकत्वे तु यागस्यैकत्वान् द्रव्यादीनां देवतानां चादिरूपालाभादिप्रपद्धिकल्पापत्तेः एवं ग्रहणानामपि तथा
सति उक्तेनानध्वर्युः प्रातस्सवने ग्रहान् गृह्णातीत्याश्विनो दशमो गृह्यते तं तृतीयं जुहोतीत्यादिवाक्ये दशमशब्देन त्रिशब्देन च प्रतीयमानस्य मु-
ख्यो यागषट्त्रितीयप्रसंगाभावप्रतीयमानः क्रमसम्बन्धे ह्युपांश्वन्तर्यामौ ऐन्द्रवायवमैत्रावरुणाश्विनाः शुक्रामन्थिनो आग्रयणोऽ
क्थ्यो ध्रुवश्चेति दश ग्रीणाः। अंशुर्दाभ्यपयोरिति ग्रहणां चापि स्वसादिहाग्रहणां तेषां जैमिनीयैककाशाखारीत्या ज्योतिष्टोमे समावेशोपि
वाजसनेयिभिर्विकल्पितस्सोमेष्वेवास्मात्तत्त्वेन प्रकृतिसोमेनतस्समावेशाभावात्। यद्यप्युपांशुः प्रथमं हूयते तथा तन्तर्यामः। ततो वायव्यो।

ग्रहस्यैन्द्रवायवस्यैकेनैव पात्रेण क्रमेणाहूयमानेन तो मैत्रावरुणास्तनश्चाश्विन इति क्रमः तत्रैन्द्रवायवमैत्रावरुणाश्विनेष्वध्वर्युणाहूयमानेषु प्रतिनि
र्ग्राह्यालयो ग्रहा हूयन्ते तेन चोपांश्वन्तर्यामौ येवषट्कारहोमौ इति रसवषट्कारहोमौ ॥ एवं वाश्विनो नवमो हूयत इति कथ्यन्ते तो पद्माभितितपा पि अ
ध्वर्युकर्तृकः सवषट्कारहोमाभिप्रायं पात्राभिप्रायं वा न तृतीयत्वं बाध्यं तस्मादैन्द्रवायवाग्रादिवाक्यविहितानां यागानां समुदायानुवादकं सोमवाक्य
मिति सिद्धं ॥ एवमग्नीषोमीयवाक्यमपि न यागविधायकं हृदयाद्यवदानवाक्यविहितावदानसंबन्धदेवताभावात् कर्ममात्रापवर्गता न तेषु च
कर्मसु यहवाक्येन पशुप्रकृतिकहृदयादिद्रव्यं लक्षणया पशुशब्देन घाग्नीषोमीयमिति देवता विधीयते एवं चैन्द्रवाग्राघारवाक्येन आ
घारसंज्ञककर्मण्यपवर्गतेव तु गृहीतवाक्याद्यान्यद्रव्यलाभे इन्द्रो धौऽध्वर इत्याघारमाघारयतीति मंत्रविनियोगात्र वाक्यिकदेवतालाभे च
सति तस्य याग इष्यतात्यवसानं न हृदयादिवाक्यनो हृदयादिवाक्यनो हृदयादिद्रव्यककर्ममात्रेष्वपवर्गतेषु पशुवाक्येन देवतालाभाते षां
यागत्वमवधार्यते अवघातिस्तु वोदकप्राशनवन्नावाद्यः ॥ द्रव्यदेवतासंबंधानगम्यमानो यागो द्रव्यदेवताद्वंद्वेनैव गम्यते एकोपशुशब्देन
वाच्यतो लघ्वस्यापि साहित्यसंस्पर्हृदयाद्युद्देशपगततेनाविवक्षितत्वात् आलभतिस्तु स्पर्शनमुखेन तत्साध्यावदानसंस्कृतहृदयाद्युपागोपल
क्षकोऽनुवादः यदि च पशुवाक्यं यागविधायकं स्यात् तर्हि हृदयादिवाक्यानामसंस्कारविधित्वं शक्यते वक्तुं उलति शिष्टपशुयागीयद्रव्यविरो
धात् विशसनेन हृदयादिविरूपनिष्पन्नो पशुजातीयद्रव्यभगापत्तेः अत एव न हृदयाद्यवदानेन भावयेदिति वमदृष्टार्थविधिसमपि उसति शि
ष्टपशुजातीयद्रव्यविरोधात् नच द्रव्यस्य रूपमासज्जापनीवास्तनास्य हृदयादिय...तोसतिनोसति शिष्टद्रव्यविरोध इति वाच्यं एवं हि सति
हृदयाद्यवदानेभ्य इत्यावंस द्रव्यानिश्च अग्नीषोमीयपयागाच्चेत्क्रमहृदयमिति गोरवोपत्तेः पशुवाक्यस्य हृदयादिवाक्यप्राप्तकर्मानुवादकत्वाविपत्तेः

३७

नपशुवाक्याद्दृष्टकल्पनं किंतु हृदयादिवाक्यत एवेति लाघवं तदेवं हृदयादिसाधनककर्मशुपशुवाक्यतोऽग्नीषोपदेवताविधाने सति पश्चाद्देवतासंबं

धायागहृदयादीनि तानि कर्माणीति निर्णीयंत इति अथवा हृदयादीनां पशुप्रभवत्वे सांनाय्यवत्सामान्यतश्चैव दानं यागसाधनमिति निश्चये सति तत्

एव प्राप्तोवदनसंबंध आलभतिनार्थकस्पर्शनमुखेनान्वितोऽयथा तस्मै भक्षप्रयच्छेदिति यागीयद्रव्यप्रतिपत्तिर्यभक्षसंयोगेनानुष्ठव

मस्य यागसाधनत्वे अवगते तत एव प्राप्ताभिक्षान्वितेन दलं एवं च प्रथममेव हृदयादिवाक्यैर्यागविधीयंते तत्रैव चाग्नीषोमीयमिति देव

ताविधिः आलभतिः पूर्ववद्देवयागान्तर्वादकः पशुशब्दोऽपि पूर्ववद्देवहृदयाद्युपलक्षकः न देवमुभयथापि पशुकोष्ठाद्यालभतिस्तु शाब्दकः।

अत एवैकादशावेपशावेऽवदानानि हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इत्यादिक्रमसमुच्चयावुपपद्येते पशुवाक्यस्य यागविधायकत्वे

यागस्यैकत्वात् हृदयादीनां विकल्पापत्तेः तदसंगतिः स्पष्टैवेति प्राप्ते सिद्धांतयति द्रव्यसंयोगाच्चोदनापशुसोमयोः प्रकरणे त्वनर्थकोद्र

व्यसंयोगो न हि तस्य गुणार्थेन। पशुसोमयोः पशुसोमवाक्ययोः चोदना पश्वग्नीषोमलक्षणद्रव्यदेवताविशिष्टस्य सोमविशिष्टस्य च या

गस्य विधिः कुतः द्रव्यसंयोगात् पशुसोपद्रव्यसंयोगात् पशुसोमद्रव्यसंयोगात् हि यस्मात्कारणात्प्रकरणोपठितेन हृदयाद्येकदेशापवा

दिवाक्यविहिते कर्मजाते सति पशुसोपद्रव्यसंयोगः अनर्थकस्यात् न हृदयाद्यपो हि पौर्णमास्यमावास्याशब्दोनादशकालसंयुक्तात् आग्नेयादि

यागानामाप्याप्रत्यभिज्ञानाद्व्रतपाककोऽहृदयादिरूपः स एव पद्रव्यैककर्मजाते स्य पशुसोमशब्दाभ्यामाकृतिविशेषवाचकाभ्यां संयु

के पशुसोमवाक्ये कथमत्र वाचकतया सार्थकस्यात् तानेन पशुसोमशब्दयोर्गौण्यावृत्त्यासात् तत्प्रकृतिकद्रव्यपरतेयात तद्दत्रवादकत्वं संभ

वतीसंकल्पयतं आह न हीति गुणः अपवादः अर्थः वृत्तिगुणाद्गतो यो गुणार्थः गौणीवृत्तिः न तस्य हि पशुशब्दस्य च मुख्यार्थत्वे संभवति।

एम
३७

गुणपार्थस्यात्तद्धि स्तुतिद्रव्यपरत्वेन युक्तमाश्रयितुमसमर्थः। न च पशुवाक्यस्य पशुविशिष्टयागविधिपरत्वे सति विशिष्टपशुनैव यागस्यैक-
र्थ्यमता इद्ध्यादिवाक्यानामानर्थक्यं स्यात् उ सति विशिष्टद्रव्यभंगापसाते सांगता विधितस्यासंभवात् अतः पशुवाक्ये पशुशब्दस्य लक्ष-
णा इति वाच्यं। यद्यस्मिन् सति विशिष्टपशोः कारणत्वं इद्ध्यादिवाक्येषु एण विधेर्वाध्येत इत्यपरं इद्ध्यादिवाक्यानामानर्थक्यं स्यात्। ने
वमस्ति इद्ध्यादीनां यागसाधनत्वेपि पशुकरणत्वस्याबाधात्। इद्ध्यादिप्रणोस्यापशोः कारणत्वानपायात्। गोमयेन पचतीतिवद्ध य
था भवति यागात्स्वर्गमिसाध्य लोकवदिद्ध्यादेर्विधानेपि करणत्वदर्शनात्। नन्वेवं पशुवाक्ये पशुद्रव्यदेवताविशिष्टयागविधिः इद्ध-
यादिवाक्यानि तु तत्रैव गुणविधयः तथापि न प्राकृतावदानोद्देशेन इद्ध्यादिविधयः किंतु इद्ध्यादिविशिष्टावदानांतरविधय इद्-
तिशमस्य पशोरभिव्यक्तिः। एवं च पशुद्रव्यस्यैकत्वात् तावदवदानसंस्कृतद्रव्यकएकोयाग इति लाघवं स्यात् इद्ध्यादिसाधनकावदानयागा इति गौरवं एवं
सोमवाक्ये सोमलताविशिष्टयागविधिः ऐंद्रवायवमिसाद्ययोगुणविधयः रसप्रणाल्याव सोमद्रव्यस्य यागसाधनत्वमभिधवादिवाक्यादवधा
र्यते। नन्वैंद्रवायवादिवाक्यविहितयागेषु च सोमस्य हविर्द्धन विधानं किं न स्यात्। न च धारावाक्यान्यथानुपपत्त्या सोमस्य हविष्टुविधि संभ
वतीति वाच्यं। रसप्रणाल्यात तदुपपत्तेः रूफत्वादिति चेन्न ऐंद्रवायवमिसादिति तद्धितस्य द्रव्यसामान्यवाचकस्य धारावाक्यसन्निहितधारासमर्थ
द्रव्यविशेषपरत्वात् ... ऐंद्रवायवादिवाक्यानां एव द्रव्यविशेषपरत्वाभावे सति गन्धकृतिनास्य नियमेन द्व्याद्येकापासंभवेन द्रव्यत्वनि-
द्रवद्रव्यविशेषविषयत्वेनैवोपपत्तेः ऐंद्रवायवादिवाक्यानामेव द्रव्यविशेष... ऐंद्रवायवादियागीयधाद्रव्यप्रकृतित्वेन सोमवाक्ये सोमस्य विधिः किंत्वस्यादिसपितिरत्वं-
यमविध्यसंभवेन हविर्विधानासंभवात्। एतेनैंद्रवायवादियागीयधाद्रव्यप्रकृतित्वेन ... अजलादिद्रव्यद्रव्येत्वोय शांताकांक्षतया अत्र श्यं प्रकृतिद्रव्यापेक्षाभावे-
ऐंद्रवायवादितद्धितस्य धारावाक्य प्राप्तप्रकृतिद्रव्यत्वेरवेक्षजलादि

३८

नप्रकृतिविध्यसंभवात्। एतेनैवाभिषवादिवाक्यात्तस्सोमप्राप्तिमुपजीव्य सोमवाक्ये सोमशब्दस्य तन्त्रन्यायेनैन्द्रवायवादियागनामधेयत्व
न्निरस्तं सोमेनयजेतेसाहस्रसोमविधेः प्राक्सोमस्याप्राप्तत्वात्। नचधाराग्रवाक्यस्य सोमरसविषयत्वेन तद्वाक्यसहितसोमरसविषयत्वमे
न्द्रवायवादिनश्छन्नस्य भविष्यतीति तत्र सोमद्रव्यस्य प्राप्तिरिति वाच्यं। नहि धाराग्रवाक्यस्य सोमरसविषयत्वे किंचित्प्रमाणमस्ति। तद्वाक्ये
सोमरसस्येव श्रवणात्। नचतत्र सोमरसस्येव श्रवणेप्यभिषवादिवाक्यसन्निधानात्तस्य सोमरसविषयत्वमस्तीति वाच्यं। नहि तन्निहितस्य
सामान्यवाचिनो विशेषं विनापर्यवसानाभाववक्त्रा शब्दस्यापर्यवसानमस्ति। श्रुतमात्रेणपर्यवसानोपपत्तेः। नचव्रीहीन्प्रोक्षतीत्यादि
षु यथा प्रकृतिग्रहणं तद्वदत्रैतद्वाक्येपि प्रकृतग्रहणं किंन स्यादिति वाच्यं वैषम्यात्। प्रोक्षणादिवाक्येषु हि लौकिकसंस्कारानुपपत्तेः। द्
पूर्वसाधनविशेषलक्षणया प्रकृतग्रहणं युक्तं धाराग्रवाक्ये तु ग्रहणोद्देशेन धाराग्रमविधानान्न प्रकृतापेक्षा। किंच सोमवाक्ये सोमद्र
व्यस्य साहस्रविधानानंगीकारे सोमस्याप्राप्तत्वेन क्रयाभिषवादिवाक्यानां तत्संस्कारविधायकत्वासंभवेन सोमक्रयेणाकृतमुपकुर्या
दित्याद्युपकारकेक्रयाभिषवादिविधायकत्वापत्त्या क्रयाभिषवादिनालौकिकसोमविषयतयाप्युपपत्तेरेकसोमविषयत्वानापत्त्या
धाराग्रवाक्यस्य कथं क्रयाभिषवादिवाक्यसन्निहितसोमरसविषयता। नहि सोमं क्रीणातीति तं क्रीतं सोममभिषुणोतीति तस्याभिषुतस्य सोम
स्य धाराग्रं करोतीत्येवं वचनान्युपलभामहे। येन क्रयादिवाक्यानामेकयागप्रकरणे आम्नातत्वेन प्रकरणाद्धाराग्रवाक्येषु प्रकृतं सोमं क्री
णातीति प्रकृतं सोममभिषुणोतीत्येवं प्रकरणविशेषितसोमस्य ग्रहणात्तद्वैषाम्येकविषयत्वमिति वाच्यं। इतिकर्तव्यताकांक्षालक्षण
प्रकरणस्य विनियोगमात्रे व्यापृतस्य [illegible] पदविशेषणत्वासंभवात्। यथा चैतत्तथा सप्तमाद्ये स्पष्टं भविष्यति। नच प्रकरणसावि

एप्र:
३८

शेषकत्वेऽपि सप्तमं पदमध्वर्युरञ्जलिना गृह्णाती सा त्रीसन्निधिहितैकहायनी संबंधिपदादिवत्सातद्विशेषाद्भिति वाच्यं नवमाध्यपादे द्रव्यसंख्याहेतुसम
वायं वा अग्निसंयोगादिस्वधिकरणेऽत्र तु स्मेषु नाधिकरणस्यादिति गुणास्त्रेत्र तु स्वेषु एकत्र सन्निधिरपरत्र विशेषकोऽनस्यात्तद्विनिगमनाविरहादि
ति वक्ष्यमाणत्वेन सन्निधेरप्यत्रा विशेषकत्वात् पदवाक्ययोरुपदस्याबाधवत्वेन निसमवायविसापेक्षत्वेन तत्र सन्निधेर्विशेषकत्वेऽपि धारणादि
वाक्येषु तथात्वे निसापेक्षाभावेन नैवेषम्यन चैवं द्रवायवादितद्धितस्य सा स्यादेव नेति विभक्तिस्य स्वनामतु स्वयोगक्षेमतया तत्सेऽपयसि इष्यानं
यति सा वैश्वदेव्यामिक्षेत्यत्र तद्धितप्रकृत सोमपरामर्शकत्वं किं न स्यादिति वाच्यं सा वैश्वदेवी सत्ये तद्धितस्य साकांक्षत्वेन तप्ते पयसीति प्र
कृतपरामर्शत्व संभवेऽप्येद्रवायवादितद्धितस्य द्रव्यवाचकस्य प्रकृतिद्रव्यनिरपेक्षजलादिद्रव्यसमर्पकप्रकृतत्वात् तथा एवाक्यतत्त्व जलादि
द्रव्यलाभेन शांतीकांक्षत्वया ऐवं वहिताभिषवादिकोपस्थित सोमविषयत्वानुपपत्तेः धाराग्रावाक्यस्य सोमरसविषयतायाः प्रागेव निरस्त
त्वात् अतः सोमवाक्ये सोमशब्दस्य स्वरूपेणान्यायेन नामधेयमिति युक्तमिति तत्र सोमद्रव्यविशिष्टयागविधिरेवास्य यः।।८।। इतोऽपि न समुदा
यानुवाद इत्याह। अचोदकाश्च संस्काराः। च शब्दोऽपुनरर्थः समुच्चये। ऐन्द्रवायवादिशब्दसंदर्भाः अचोदकाः यागानां विधायका न भवं
ति येन पशुसोमवाक्येन तदनुवादके स्यातां किंतु संस्काराः। अवघातग्रहणादिविधायिन एवैते। अश्रुतविहितेषु यागेषु केषां समुदायो न घेतो अवघातग्रह
णामात्र विधाने नैवोभयेषां वाक्यानामुपपत्तेः संभवति हि ऐन्द्रवायवादिग्रहणेन यागयोग्यानि कुर्यात् ऐन्द्रवायवादिग्रहणे सोमरसं संस्कुर्यादि
ति तत्र यागाश्च अभिचरितावघातस्य द्रव्यस्वतो विशिष्टग्रहणस्य च यागमन्तरेणानुपपत्तेर्यागापेक्षायामग्नीषोमीयं पशुमालभेतेति होमेन च पु
जेतेति च वाक्यं संस्कार्यद्रव्यदेवता संबंधानुपपादयदाश्रयान्तराकांक्षं सन्निहितादिनैव यागावश्यंभावे प्याग्नेयादिवाक्योक्तस्य द्रव्यदेवतासंबंध

स्य निर्वाहकत्वेन तत्रैव च यागः कल्प्यते एवं रूढ्या घैंद्रवायवादिवाक्येष्वेव यागकल्पनात्तु पशुसोमवाक्येन तु न तत्त्वा स्फुटं एव । अन्यथा विद्ध्वाक्यमप्यु-
त्पादकं न स्यात् । पशुसोमवाक्ययो रूढ्या घैंद्रवायवादिवाक्यापेक्षितयागविधायकत्वं न स्यात् । आग्नेयवाक्यापेक्षितयागविधायकत्वसंभवा-
दिति वाच्यं । विशिष्टाभिधानेन पर्यवसितस्य हि वाक्यस्याकांक्षावलोद्वाक्यान्तरेण संबंधः । आग्नेयवाक्ये च पुरुषव्यापाराश्रवणाद्धि विशिष्टभा-
वनाभिधानमेव न पर्यवस्यति । अपर्यवसितस्य च न विद्ध्वाक्येनान्वय इति विशिष्टभावनाविधिपर्यवसानाय पुरुषव्यापाररूपो यागस्तत्रैव
कल्प्यते । अतो विद्ध्वाक्यमनुवाद इति युक्तं । इह तु वचनग्रहणस्य पशुव्यापाराश्रवणात् पर्यवसन्नमेवाभिधानं किं विभिधानानंतरमेव द्दा-
न देवतासंबंधनिर्वाहकापेक्षा मा भूदिति । पशुसोमवाक्ये अपेक्षितविधानार्थं संपद्यते एवं च अतो नैव निर्वाहोपपत्तौ रूढ्या घैंद्रवायवादि-
वाक्येष्वश्रुतयागकल्पनं न भवतीति लाघवं तस्मात् पशुसोमवाक्ययोर्यागविधायकत्वं । ~~तदुक्तं सोमस्य~~ वास्य यागविधायकत्वे देवतानां ग्रहणानां
च विकल्पापत्तौ क्रमसमुच्चय इत्यनिन्नोपपद्यत इति तन्नाह । न ह्येकस्मिन् कर्मण्यभ्यासो द्रव्यप्रत्ययकादनर्थकं हि स्यात् द्रव्यगुणाभावात् । ऐंद्रवा-
यवादिवाक्येषु ऐंद्रवायुभ्यामिदं हातव्यमिति यावत् ग्रहणाभ्यामिदं हातव्यमिति एवं तत्र देवतोद्देशादि शिष्टग्रहणादनि श्रुतानि तत्र प्रतिग्रहणं तत्तद्दे-
वतोद्देशो न्यासद्रव्यमुपपद्यते तथाविधग्रहणोद्देश्यत्वेन प्रधानस्योपकारकत्वं नित्यमिति । तत्र कर्मणः ग्रहणस्य अभ्यासः पुनः पुनरनु-
ष्ठानं ग्रहणानां समुच्चयः स्यादिति यावत् । कुतः । न ह्येकहात देवतासंयोगभेदात् न हि तत्र देवतोद्देशजनितादृष्टस्य रूपीनग्रहणेनोत्पद्यमानमुपका-
रः एकदेवतासंयोगसहृदीनेन एकेन ग्रहणेन संभवति अतो ग्रहणानां समुच्चयः । न तु नाव देवतासंयुक्तादेकस्मादेव ग्रहणात्तथाविधोपका-
रस्संभवतीत्यत आह द्रव्यपृथक्त्वादिति । द्रव्यमुपयुक्तादि मितसोमलतासंभृतस्य रस एकपत्रवसतीवर्युद्के । प्रभृतमभिषवहृतस्य रसस्य द्रव्यस्य—

पूर्वपक्षेः   नां

त्पशुशब्दलक्षितं हृदयाद्यालभेत तदग्नीषोमीयं कुर्यादिति हृदयाद्यालंभानुवादद्वारेणैकादशानामवदानानां प्रत्येकं
देवतान्वयादेकादशयागाः सिद्धांते च पशुद्वैकेन देवतान्वयैक्यादेको याग इति विशेषो विहितः लक्षणेन संगतिश्चानेन
सेदासेदफलत्वात्सूचिता अनंतरसंगतिस्त्वाघाराग्निहोत्रवाक्यविहितयोः कर्मणोर्दध्यूर्ध्वादिवाक्यानां गुणविधित्वोपपन्ने
कर्मविधित्वाभावात्प्रकृतकर्माभावेन समुदायानुवादे निरस्ते हृदयेडवा यवादिवाक्यानां पशुसोमवाक्यविहितयोः कर्मणो
र्गुणविधित्वायोगात्कर्मविधित्वापत्तेः प्रकृतकर्मसद्भावात्पशुसोमवाक्ययोः समुदायानुवादत्वं न विरुध्यतीत्याशंकानिरासार्थ
त्वात्स्पर्शनं न वदतीति नास्पर्शनापेक्षं विशिष्टानि तीयागानाक्षेपात्तेयं द्व्याख्यानुक्तेत्याशंका यथा वदतो स्पर्शनाक्षेपस्तथा सोमे पि
यागाक्षेपद्वत्युक्तेतदुपपादनायायमेवेत्युक्तं ग्रहणाद्यूयागपर्यंतत्वं विना देवतान्वयायोगाद्यागपर्यंतत्वं सामानाधिकरण्येनाप्या
विवक्षितं यद्वा यथा पशौ पूर्वपक्षे बहवो यागाः सिद्धांते चैकस्तथा सोमे पीत्युक्तेतदुपपादनार्थं पूर्वपक्षे ग्रहणवाक्येष्वेव यागक
ल्पनाभिधानायायमेवेत्युक्तं ताद्यांजयाद्यालंलतदनुवादव्याख्येवत्युक्तानयज्ञानुवादव्याख्येत्याह तथा सतीति ताभ्यामुक्तव्याख्या
नेपि पूर्वपक्षस्य सोत्त्व सिद्ध्यर्थं उपांशुयाजाधिकरणपूर्वपक्षसूत्रस्येन पौर्णमासीवदुदेनेहापि पूर्वपक्षाभिधानं स्वस्वयत्न पूर्व

पक्षमाश्रित्यैतत्तच्चेति। नन्विह रूपश्रवणात्कथं पौर्णमासीत्युच्यतेत्याशंक्य सोमवाक्ये देवतानवगतेरैंद्रवायववादिवाक्यानां
च यागानुमानात्तद्यागपर्यवसाने न वाक्यांतरेण न च याद्देवतासमर्पकत्वेनोपपन्नेर्यागानां च रूपवत्त्वात्तानवादरूपत्वमुपपाद
यति तथा हीति। सोऽकं व्याचष्टे नहीति। ननु दध्यादिवाक्यवदैंद्रवायववादिवाक्येष्वपि विशिष्टविधिगौरवापत्तेः कर्मविधित्वाभ्यु
पगमो न युक्त इत्याशंक्याह यद्यपीति। सिद्धांते त्वैंद्रवायववादिवाक्येष्वपि देवताविशिष्टग्रहणविध्य[illegible]भ्युपगमादुक्तगौरवा
पत्तिरित्याह अपि चेति। तत्सन्निधेर्गुणार्थेन तु न स्यादिति त्रिपद च चोपपदस्यार्थातो मंत्रवदनुवादस्य कर्मणो विधेयत्वान्निषेधान्न सोम
वाक्ये यागविधिरित्याह किं चेति। मंत्रवदनुवादत्वं याद्दृशशब्देनोक्तं। इदं स्वपक्षे सोमशब्दस्य प्रत्युवादत्वाद्रवानिरुक्तं। सोऽकं
व्याचष्टे कथं चेति। सत्यां गतावेकस्यैव विधिशक्त्यभ्युपगमस्य न्याय्यत्वात् मंत्रवदनुवादे कर्मणि सति गुणे विधिशक्तिः संक्रा
मतीत्या[illegible]धाराग्निहोत्राधिकरणे सिद्धमित्यर्थः। किं तावदित्यादि भाष्येण लक्षयति यजत्योरनुवादत्वे सिद्धे तेनदध्यादिरसमं
त्यकेषु यागेषु यत्र सोमशब्दयोरसामर्थ्यात्त्वेनानुवादायोगादुत्पत्तिशिष्टगुणावरोधेन गुणविध्ययोगादानर्थक्यमाशंक्य
तद्दध्यादीत्युक्तं तेन न लक्षणया तद्दध्यादिरसानुवादकतोक्ता। तत्र पशुवाक्ये देवताविध्यभ्युपगमाद्वाक्यभेदापत्तेरिष्ट्यविधयो

८४

राम
७६